अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

द्वाविंशे वर्षे प्रथमोऽङ्कः

१५ जनवरी, २०००

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६, वाणी–विहारः, नयी दिल्ली–११००५९

अर्वाचीनसंस्कृतम् (२२/१)

१५ जनवरी, २००० ई०

विषयसूची

विषय	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्	सम्पादकः	१-२
२. मातः संस्कृतवाणि !	प्रो० वें० कुटुम्बशास्त्री	३
३. भावसन्धिः	डॉ० रमाकान्त शुक्लः	४
४. सरस्वतीसुप्रभातम्	डा० इच्छाराम द्विवेदी 'प्रणवः'	५
५. विश्वनाथसुप्रभातम्	डा० इच्छाराम द्विवेदी 'प्रणवः'	६
६. अन्नपूर्णासुप्रभातम्	डा० इच्छाराम द्विवेदी 'प्रणवः'	८
७. सरस्वती वन्दना	डा० मञ्जुलता शर्मा	९
८. श्रीरामस्तोत्रम्	त्रिपाठी भास्कराचार्यः	१०
९. भाषेयं दिव्या	त्रिपाठी भास्कराचार्यः	११
१०. भयानकं यद्भुवनेश्वरेऽभूत्	श्री श्री० सुन्दरराजः	१२
११. अहो ! दौर्भाग्यमुत्कलानाम् !	प्रो० हरिश्चन्द्र रेणापुरकरः,	१७
१२. कलिङ्ग-प्रकम्पनः	डॉ० शशिनाथ झा, दरभंगा	२०
१३. कारगिल-विजयः	डॉ० शशिनाथ झा	२२
१३. नवसंवत्सर-शुभकामना	आचार्य चन्द्रदीप शुक्लः, प्रभात कुमार शर्मा	२४
१४. कार्गिलम्	डॉ० रवीन्द्रकुमार पण्डा	२५
१५. 'प्रकाश-किरणावली'	श्री प्रकाशचन्द्रमिश्रः	४०
१६. कवोष्णम्	डा० इच्छाराम द्विवेदी 'प्रणवः'	५६
१७. इक्षुमती	डा० इच्छाराम द्विवेदी 'प्रणवः'	५७
१८. त्वम्	डा० इच्छाराम द्विवेदी 'प्रणवः'	५८
१९. कामयेऽहम्	डॉ० जनार्दनप्रसाद पाण्डेय 'मणिः'	५९
२०. जय-जय भारतदेश !	डा० परमहंस मिश्रः	६०
२१. ,, ,, (हिन्दीरूपान्तरम्)	डा० रमाकान्त शुक्लः	६१
२२. देववाणी-परिषद्वार्ता	आनन्दवर्धनः	६२
२३. संस्कृत-जगद्वार्ता	अभिनव शुक्लः, राधावल्लभ 'राजीवः'	६३
२४. अ०भा० संस्कृत पत्रिकापद्यपाठप्रतियोगिता-सूचना		६७

"देववाणी-परिषद्, दिल्ली"-कृते डा० रमाकान्तशुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली-११००५९ फोन : ५६४०३२४" इति मुद्रणालये मुद्रापयित्वा "आर-६, वाणी विहारः, नई दिल्ली-११००५९" तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (२२/१) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-१-२००० अस्यांकस्य मूल्यम् रु० १५-०० Rs. 15.00

सम्पादकीयम्

विगतखैष्टवर्षस्य अन्तिमे मासत्रये भारतेन उत्कलेषु भयङ्करी विपदनुभूता। २९.१०.१९९९ दिनाङ्कात् दिनत्रयं यावत् तत्र भयानकझञ्झाप्रकोपस्य ताण्डवमभूत्। सम्पूर्णदेशतस्तत्र साहाय्यकर्मणि कृतेऽप्यद्यापि तत्र भयंकरविनाशस्य चिह्नानि दृश्यन्ते। उत्कलत्रासदीमवलम्ब्य कवीनामपि शोकः श्लोकत्वमागतः। श्रीश्री० सुन्दरराज-डॉ० शशिनाथ झा-प्रा० हरिश्चन्द्ररेणापुरकराणां रचना अत्र प्रमाणम्।

जून-जुलाईमासयोः कारगिलविजयेन यः समुत्साहो देशे जागरितोऽभूत् तेन नैके संस्कृतरचनाकाराः प्रेरिताः। अर्वाचीनसंस्कृतस्य कारगिल-विशेषाङ्के काश्चिद्रचनाः तमवलम्ब्य प्रकाशिता जाताः। ततः परमपि काश्चित् रचनाः विविधपत्रेषु प्रकाशिता अवालोक्यन्त। डा० रवीन्द्रपण्डा-डा० शशिनाथ झा-महाभागाभ्यामप्यस्मिन् विषये काव्यं रचितम्। तदत्राङ्के प्रकाश्यते।

२४.१२.१९९९ तारिकायां खैष्टदिनाङ्कानुसारमेतत्पंक्तिलेखकस्य एकोनषष्टितमो जन्मदिवस आपतितः। कैश्चन जनैरयं दूरभाषेण वर्धापितः। तस्मिन्नेव दिने सायंकाले दूरदर्शनसमाचारतो ज्ञाता इण्डियनएयरलाइन्स-८१४-विमानापहरणस्य सूचना। जन्मदिवसोल्लासस्तिरोहितः। २५.१२.१९९९ तारिकायां प्रधानमन्त्रिणः श्री अटलबिहारी वाजपेयिनो जन्मदिवस आसीत् । तमवलम्ब्य प्रस्ताविताः सर्वेऽप्युत्सवाः निरस्ता जाताः । देशे चिन्तौत्सुक्यादिभावा आविरभूवन्। पुनः सञ्चारमाध्यमेभ्य आतङ्कवादिभिर्निर्दयं व्यापादितस्य रूपेनकतियालस्य वार्ताधिगता। चतुर्विंशसंख्यानां यात्रिणां दुबई-विमानपत्तने मुक्तिः श्रुता, दृष्टा च। विमानापहर्तृणां दुर्दान्तातङ्कवादिनां मोक्षण-विषयिणी कांक्षापि श्रुता। भोपालवास्तव्याया भट्टाचार्यबालिकाया दृढनिश्चयपरं वक्तव्यमपि श्रुतम् । अस्मिन्नेवान्तराले पूर्वराष्ट्रपतीनां डा० शङ्करदयालशर्मणां निधनवार्तापि श्रुता। भारतराष्ट्रे विचित्रा मनःस्थितिरदृश्यत लोकानाम्। अन्ते च भारतशासनेन यथातङ्कवादिनो मुक्ता यथा च विमानापहर्तारः कन्धारविमानपत्तने विमानान्निःश्रेण्या नीचैरवतीर्य वाहनेन स्वं लक्ष्यं प्रति प्रयाता यथा च बन्धकीकृता यात्रिणो दिल्लीं प्राप्तास्तत्सर्वमवलोकितम्। भारतशासनस्य प्रधानमन्त्रिणः सन्देशो दूरदर्शनतः प्रसारितो दृष्टः श्रुतश्च। एवमस्य काण्डस्य पटाक्षेपो गतवर्ष एव सञ्जातः।

आलोचना-प्रत्यालोचना अपि प्रावर्तन्त। विकटा स्थितिरासीत्। एतस्यां स्थितौ वीरमातरः, वीरविधवाः, वीराः किं किमनुभवन्ति स्म तदपि न कस्याप्यपोहितम्। यात्रिणो मुक्ता-इत्याश्वस्तिः सर्वस्यैव प्रियङ्करी किन्त्वस्माकं सुरक्षाव्यवस्थां वञ्चयित्वा यथातंकवादिभिः प्रश्ना अस्मत्समक्षं स्थापितास्तत्रावश्यमेवावहित-व्यमस्माभिः। **'वयं राष्ट्रे जागृयाम'**-इत्येतत्संस्कृतवर्षादर्शवाक्यमवश्यं स्मर्तव्यम् पालनीयञ्च।

१.१.२००० तारिकायां पौष कृष्ण दशमी तिथिरासीत्। इयं तिथिर्वैक्रमसंवत्सरानुसारं मम जन्मतिथिरासीत्। इत्थं मदीययोर्जन्मदिवसयोर्मध्ये एकतो देशेन आतङ्कभयवैवश्यदुःखस्थितयोऽवलोकिताः। अपरतश्च आश्वस्तिरपि काचिदधिगता। मयापि भावसन्धिरनुभूतः। भावसन्धेरियं दशा सप्तभिः पद्यैः प्रकाश्यते यस्यां देशस्य शुभोदर्कः काम्यते, मनुजतायाश्च मङ्गलमिष्यते। डा० भास्कराचार्य त्रिपाठीनः सर्वगुरुमयी रचनाद्वयी, प्रणव महाकवेः भक्ति शृङ्गारमय्यो रचनाः, मैनपुरीवासिनःश्रीप्रकाशचन्द्रमिश्रमहानुभावस्य 'प्रकाशकिरणावली' डा० मञ्जुलतायाः सरस्वती-स्तुतिः, आकाशवाण्या समायोजिते गणतन्त्रदिवस-सर्वभाषाकविसम्मेलने डा० परमहंसमिश्रेण पठिता संस्कृतकविता तस्या हिन्दीरूपान्तरञ्च-इयं सर्वापि सामग्री प्रत्यग्रे वर्षे प्रत्यग्रतां पाठकेभ्यो दास्यतीत्या शास्यते। २००० तमं ख्रैष्टं वर्षं शुभं भूयात्। अग्रे च २०५७ तमं वैक्रमं वर्षमपि शुभं भूयात्। 'सारस्वत' पत्रस्य प्रधान सम्पादकेनाचार्य चन्द्रदीप शुक्लमहोदयेन 'संस्कृतप्रचारक' पत्रस्य प्रबन्धसम्पादकेन श्रीप्रभातकुमारशर्मणा च नववर्षशुभकामनाः प्रहिता या भवद्भ्योऽपि समर्प्यन्ते। अन्ते चेदं काम्यते-

योऽयमातङ्कवादः खलानां खलः
पूजितो मुह्यमानो जगद् बाधते।
आयतौ नैव कीर्तिं जयं चाप्नुयात्
नूतने वत्सरे वो भवेन्मङ्गलम्॥

विदुषामाश्रवः

१५-१-२०००

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

मातः संस्कृतवाणि !

–प्रो० वें० कुटुम्बशास्त्री
निदेशकः, राष्ट्रिय संस्कृत संस्थानम्, नयी दिल्ली

कल्याणान्यकरोरलौकिकसुखप्राप्त्यैकहेतोः श्रुती-
र्दत्वाऽस्मभ्यमिहैहिकं ननु सुखं संवर्ध्य तन्मूलकम् ।
कृत्वास्माञ्जगतीतलेऽग्रपुरुषान् ज्ञानेन वृद्धान् गुरून्
मातः संस्कृतवाणि ! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥१॥

कल्याणान्यकरोः शमादिमहितैर्मन्वादिभिः प्रोदितान्
योगक्षेमकरान् समाजहितदान् धर्मान् सुयोग्यान् शुभान्।
दत्वाऽस्मभ्यमशिक्षयः सुचरितं शस्यं महीमण्डले
मातः संस्कृतवाणि ! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥२॥

कल्याणान्यकरोर्महातिशयसदवृत्तं महापूरुषं
मर्यादापुरुषोत्तमं रघुपतिं योगीश्वरं केशवम् ।
दत्वाऽस्मभ्यमशिक्षयः सुविशदं योगं च सांख्यं महत्
मातः संस्कृतवाणि ! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥३॥

कल्याणान्यकरोः सुदुर्गममहारण्यप्रभे वाग्वने
वेदाख्ये स्ववगाहनाय शतशो न्यायाख्यमार्गान् पटून् ।
दत्वाऽस्मान् जगतीप्रपूजितवचो वैचारिकाँश्चाकरो-
र्मातः संस्कृतवाणि ! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥४॥

कल्याणान्यकरोरचिन्त्यरचनाचातुर्यधुर्यं सुधा-
निष्यन्दिप्रतिभाविलासवचनं श्रीकालिदासं गुरुम् ।
दत्वाऽस्मभ्यमिह त्रिकालरुचिरं वाग्रूपमालेख्यकं
मातः संस्कृतवाणि ! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥५॥

(इमे श्लोकाः १२.१२.१९९९ तारिकायां प्रो० वें० कुटुम्बशास्त्रिणा 'अर्वाचीनसंस्कृत'स्य एकविंशपूर्त्यङ्कं लोकायार्पयता श्राविताः।)

भावसन्धिः

–डॉ० रमाकान्त शुक्लः

विमानं नीतवन्तस्ते विना काठिन्यमस्माकम्
'अमृतसर'-वायुयानस्थानके तैलं गृहीतं तैः ।
पुनर्व्यापादितो रूपेनकतियालो नृशंसैस्तै-
र्वयं विवशाः स्थिता गेहे, विलोक्यैतद्भृशं दूये ॥१॥

अथो दुबईं गतैस्तैर्मोचिताः किल यात्रिणः केचित्
तदनु कन्धारभूमौ व्यूहरचना तैः कृता सम्यक् ।
दिनान्यष्टौ स्थितैस्तैस्तत्र, यद्यत्काङ्क्षितं तत्तत्
गृहीतं शासनात्सर्वं, विलोक्यैतद् भृशं दूये ॥२॥

विमाने ये स्थितास्ते यात्रिणो निजगेहमायाताः
प्रसन्नोऽहं, मुखान्मृत्योर्विमुक्तास्तेऽहमिति मन्ये।
परं विज्ञाय मुक्तिं क्रूरकर्मातङ्किनां त्वरितां
शिरोऽवनतं मदीयं ग्लानितोऽहं मानसे दूये ॥३॥

न दूयेऽहं रुजो वित्तस्य नाशाद्बन्धुनाशाद्वा
न दूयेऽहं सभायां मेऽपमानान्मित्रघाताद्वा ।
न दूये पुत्रशाठ्याद्वाप्युपेक्षायाः स्वजायायाः
परं राष्ट्रस्य वैवश्यं विलोक्याहं भृशं दूये ॥४॥

स धन्यो राष्ट्रपतिपूर्वः कृती शंकरदयालो यो
जहौ प्राणान् विवशताग्लानिनाट्यप्रेक्षणात्पूर्वम् ।
ह हा रचना वराकी नष्टपतिका कां गतिं यास्यति
दशां श्रुत्वा तदीयां हे प्रभो ! चित्ते भृशं दूये ॥५॥

सहस्राब्द्याः शताब्द्या वान्तिमं वर्षं शुभं भूयात्
जगत्यातङ्कवादोन्मूलनस्यारम्भ उद्भूयात् ।
न देशस्यास्य महिमा स्वाभिमानो वा तिरोभूयात्
तथा भूयात् प्रयत्नो येन नैवाहं पुनर्दूये ॥६॥

ज्वलतु चलितेन्धनोऽग्निः पन्नगः स्वीयां फणां कुरुतात्
स्वमहिमानं विजानीयाद्विवशतादष्टदेशोऽयम् ।
'स्वराष्ट्रे जागृयामे'तीदमस्माभिस्सदा स्मार्यं
न चेन्नो वञ्चयेत्कश्चित्तदा नेत्थं पुनर्दूये ॥७॥

(रचनातिथि : १.१.२००० ई०)

सरस्वतीसुप्रभातम्

—डा० इच्छाराम द्विवेदी 'प्रणवः'

चन्द्रोज्ज्वले विकचपद्ममनोज्ञवक्त्रे
हंसासने कुमुदकुन्दसुहासरम्ये
कासांशुके विमलकान्तियुते शरण्ये
मातः सरस्वति शुभे तव सुप्रभातम् ॥

वक्षोजयोः स्फटिकरत्नमयी सुमाला
वीणा करे निखिलनादमयी सुरम्या
वेदाक्षरैरंधरपल्लव-शोभिताङ्गि
मातः सरस्वति शुभे तव सुप्रभातम् ॥

वर्णप्रभाविलसितस्फुरिताधरोष्ठे
शब्दार्थरम्यरचनावरदे शुभाङ्गि
सत्काव्यकौशलविभूतिकरि प्रसीद
मातः सरस्वति शुभे तव सुप्रभातम् ॥

रम्येऽधरेऽस्ति निहितं शुचि शब्दशास्त्रं
चञ्चत्कटाक्षरचनेऽखिललक्षणास्ते
औचित्यमावसति हासकलाकलापे
मातः सरस्वति शुभे तव सुप्रभातम् ॥

ज्ञानाब्धिवारिशिशिरस्य तवाञ्चलस्य
छायातले सुकवयो मुदिताः शयानाः
भावेषु दिव्यकवितासुखमाप्नुवन्ति
मातः सरस्वति शुभे तव सुप्रभातम् ॥

हंसासना निगदितासि जनैः सुविज्ञैः
हंसा वसन्ति खलु मानसरोवरेषु
रम्ये निषीद मम मानसहंसपृष्ठे
मातः सरस्वति शुभे तव सुप्रभातम् ॥

वृत्तात्मिका स्फटिकरत्नमयी हि माला
मोदेन संसरति रक्तकराङ्गुलीषु
वृत्तं ममापि भुवि तच्छविमातनोतु
मातः सरस्वति शुभे तव सुप्रभातम् ॥

ज्योत्स्नाकरे शुचिमुखेन्दुधरे वरे हे
पीयूषवर्षिणि सुहर्षिणि सज्जनानाम्
आस्येऽमृतं वसतु मेऽम्ब तव प्रसादैः
मातः सरस्वति शुभे तव सुप्रभातम् ॥

प्रातःस्मृतेन भव्येन भावनाभरितेन च
प्रणवस्तुतिगीतेन शारदाम्बा प्रसीदतु ॥

इति श्रीमत्प्रणवकविरचितं सरस्वतीसुप्रभातस्तोत्रं सम्पूर्णम् ॥

विश्वनाथसुप्रभातम्

—डा० इच्छाराम द्विवेदी 'प्रणवः'

आनन्दकाननविहारकृताधिवास !
हैमाद्रिजाननसरोजसुगन्धभृङ्ग !
हे विश्वनाथ कुरु देव! कटाक्षमोक्षं
वाराणसीपुरपते ! तव सुप्रभातम् ॥

गङ्गातरङ्गतरलः शुचिशीतलोऽयं
वातोऽनुसेवनपरस्तव पादपद्मं
संवाहयत्यतिसुखेन विभो प्रभाते
वाराणसीपुरपते तव सुप्रभातम् ॥

नीता निशा गिरिसुतासितकेशपाशे
पीतासवोऽसि गिरिजाननपङ्कजस्य
उन्मीलयामलदृशौ भव रागयुक्तौ
वाराणसीपुरपते तव सुप्रभातम् ॥

सिन्दूरबिन्दुतिलका दिगियं हि पूर्वा
कूजद्विहङ्गरशना रवमातनोति
द्वारि स्थिता तव शुभाननदर्शनार्थं
वाराणसीपुरपते ! तव सुप्रभातम् ॥

गङ्गाजलेन विमलेन कृताभिषेका
आनन्दिता हर हरेति मुखैर्जपन्तः
तिष्ठन्त्यमी तव गृहे शिवभक्तसङ्घाः
वाराणसीपुरपते ! तव सुप्रभातम् ॥

स्नानं विधाय जननी तु ममान्नपूर्णा
दर्वीकरा निजमहानस एव हृष्टा
नैवेद्यमापचति ते भव सेवनार्थं
वाराणसीपुरपते ! तव सुप्रभातम् ॥

विघ्नौघशैलदलनाय रतो गणेशः
त्वदद्वारदेश इह भैरव एष सज्जः
निद्रां विमुञ्च भगवन्नसि दीनबन्धुः
वाराणसीपुरपते ! तव सुप्रभातम् ॥

हे विश्वनाथ मदनान्तक चन्द्रमौले
देवाधिदेव मृड शर्व जगन्निवास !
हे निर्गुणागुण विधेहि कृपाकटाक्षं
वाराणसीपुरपते! तव सुप्रभातम् ॥

विश्वनाथ शिव शम्भो ! विद्यागुरुरसि विनाशयाघं मे ।
प्रणवस्ते शिशुरेष द्रष्टुं त्वां वन्दते प्रातः ॥

इतिश्रीमत्प्रणवकविरचितं विश्वनाथसुप्रभातस्तोत्रं सम्पूर्णम् ॥

अन्नपूर्णासुप्रभातम्

–डा० इच्छाराम द्विवेदी 'प्रणवः'

समस्तविश्वस्य चराचरस्य
करोषि नित्यं परिपालनन्त्वम्
पवित्रवात्सल्यमनोज्ञमूर्त्ते !
सदान्नपूर्णे तव सुप्रभातम् ॥

सुवर्णकेयूरकिरीटहारैः
सुकुण्डलाभ्याञ्च मनोरमासि
सुवर्णवर्णासि ममाम्ब नूनं
सदान्नपूर्णे तव सुप्रभातम् ॥

पवित्रगङ्गाजलसीकराशी
प्रभातवातस्तव पादपद्मे
करोति भक्त्यैव निजप्रणामं
सदान्नपूर्णे तव सुप्रभातम् ॥

महानसे हस्तगृहीतदर्वी
त्वमन्नपाकं तु यदा करोषि
तदा सुगन्धेन धरां पृणासि
सदान्नपूर्णे तव सुप्रभातम् ॥

गृहे गृहे त्वं गृहिणी स्वरूपा
जनानसंख्यान्सुरसान्नदानैः
स्वबालकान्पालयसीह नित्यं
सदान्नपूर्णे तव सुप्रभातम् ॥

क्षुधास्वरूपेण शरीरसंस्था
तथान्नरूपेण बहिः स्थितासि
सुतृप्तिरूपेण हृदि स्थिता च
सदान्नपूर्णे तव सुप्रभातम् ॥

न कोऽपि कर्माचरणे समर्थो
भवे भवत्येव विना कृपां ते
त्वमादिशक्तिः खलु देहभाजां
सदान्नपूर्णे तव सुप्रभातम् ॥

शिवप्रिये सर्वजगन्निवासे
शिवे शिवाराधनदत्तचित्ते
शिवं कुरुष्वामृतदे सुतस्य
सदान्नपूर्णे तव सुप्रभातम् ॥

इच्छारामद्विवेदोऽयं प्रणवस्तावकः शिशुः ।
अन्नपूर्णाकृपाकाङ्क्षी श्लोकते त्वामहर्निशम् ॥

इतिश्रीमत्प्रणवकविप्रणीतमन्नपूर्णासुप्रभातस्तोत्रं सम्पूर्णम् ॥

सरस्वती वन्दना

–डा० मञ्जुलता शर्मा,
पी-एच०डी०, डी०लिट्
संस्कृतविभागाध्यक्षा,
सेंट जान्स कॉलिज, आगरा-१

शुभ्रवस्त्रावृतां देवीं शोभितास्यां सरस्वतीम् ।
वीणाया वादने दक्षां वन्दे देवसमर्चिताम् ॥१॥

पद्मासने समासीनां शुभ्रहारैश्च शोभिताम् ।
शुभ्रच्छत्राम्बरैर्युक्तां वन्देऽहं हृदये सदा ॥२॥

जडतामपहायाशु फलदात्री सदा भव ।
हृदये मे दयाशीले वासं कुरु सरस्वति ॥३॥

श्रीरामस्तोत्रम्

–त्रिपाठी भास्कराचार्यः

सद्भिः सेव्यं कौशल्येयं नित्यं गेयं वन्दे ।
सद्वंश्यानां देवादीनामेकं ध्येयं वन्दे ॥

पुत्रेष्ट्या पुण्यं लब्ध्वा हव्यान्नानां सम्पर्कम् ।
धन्याऽयोध्यायां तं माताऽसूत प्राचीवार्कम् ।
सप्तर्षीणां नक्षत्राणामन्तर्वेद्यं वन्दे ।
सद्भिः सेव्यं .. .. ॥१॥

बाल्येऽधीती शास्त्रे शास्त्रे चक्रे शस्त्राभ्यासम् ।
सुन्दस्त्रीपुत्रादिध्वंसी तेने लोकोल्लासम् ।
ग्राव्णो वेल्लद्बालामूर्त्या स्तोत्रैः सेव्यं वन्दे ।
सद्भिः सेव्यं .. .. ॥२॥

रौद्रं चापं भङ्क्त्वा रामो वृत्वा सीता-पण्यम् ।
राज्यं हित्वा भ्रात्रा पत्न्या साकं यातोऽरण्यम् ।
मन्दाकिन्या रम्ये तीरे दृक्संवेद्यं वन्दे ।
सद्भिः सेव्यं .. .. ॥३॥

गोदावर्या अङ्कात् सीतां रक्षोराजोऽहार्षीत् ।
वायोः सूनुर्लङ्कां कृत्स्नां तत्प्रात्यै चाधाक्षीत् ।
वन्यैर्मित्रैः सिन्धोर्बन्धे पूर्णोद्देश्यं वन्दे ।
सद्भिः सेव्यं .. .. ॥४॥

त्रैलोक्यादातङ्कं धुन्वन् कुर्वन् रक्षः प्रेतम् ।
रामः सीतामानैषीद् भूयः स्वीयं साकेतम् ।
सर्वेषां धौरेयं नामस्मृत्या मेयं वन्दे ।
सद्भिः सेव्यं .. .. ॥५॥

रामं स्मृत्वा वाल्मीकिः सत्काव्यं सद्योऽगासीत् ।
दास्यं दूरीचक्रे गान्धी स्वातन्त्र्यं चाकार्षीत् ।
ग्रामे ग्रामे गेहे गेहे श्वासैः पेयं वन्दे ।
सद्भिः सेव्यं .. .. ॥६॥

भाषेयं दिव्या

—त्रिपाठी भास्कराचार्यः

देवानां भाषेयं दिव्या सर्वार्थानां सन्धात्री ।
स्वर्धेनुर्वा कल्पद्रुर्वा कामानामेषा दात्री ॥
वाल्मीकिर्वल्मीकैश्छन्नः शब्दाकूपारं तीर्णः ।
व्यासेनायं कृत्स्नो वेदः सद्यो विश्वस्मिन् कीर्णः ।
ब्राह्मी जाता हस्तन्यस्ता कीर्त्या सम्पूर्णा पात्री ।
देवानां भाषेयं दिव्या .. .. ॥१॥

दृश्यं काव्यं चक्रे भासः क्ष्माचक्रे तेने भासः ।
सर्वः स्वप्नोऽयं संसारस्तन्नाट्ययानां विश्वासः ।
पद्मावत्यां सापत्न्यं नो मेने वीणासद्गात्री ।
देवानां भाषेयं दिव्या .. .. ॥२॥

उर्वश्या रागं सङ्गुम्फन् कश्चित् काव्यश्रीर्जातः ।
ग्रीष्मादीन् षट्संख्यान् कालान् गायँल्लोके विख्यातः ।
तत्काव्ये मेघो दूतात्मा व्योम्नः सञ्जातो यात्री ।
देवानां भाषेयं दिव्या .. .. ॥३॥

माघो दण्डी बाणो भोजः श्रीहर्षः पुत्रास्तस्याः ।
येषां काव्यक्रीडायाः शश्वत् सर्वे लोका वश्याः ।
ढक्कायाः सूत्रावल्या धन्या शम्भोरेषा छात्री ।
देवानां भाषेयं दिव्या .. .. ॥४॥

भयानकं यद्भुवनेश्वरेऽभूत्

—श्री श्री० सुन्दरराजः

अथोत्थितः पूर्वदिशः पयोनिधेरभूतपूर्वेण रयेण मारुतः ।
अवादनुस्यूततयोत्कलेष्वहो अवर्णनीयं कलयन्नुपप्लवम् ॥१॥

अस्मिन् प्रमाथीति यथार्थनाम्नि वर्षे तुलामासि स कृष्णपक्षे।
पञ्चत्वहेतोरधिपञ्चमीं नु ववौ प्रवातो भुवनेश्वरान्तः ॥२॥

प्रभातेकाले महता जवेन समुद्रमुत्तीर्य स पारदीपम् ।
उदीर्णपूर्णार्णववीचिमग्नं तूर्णं पुरं सर्वमधाद्विशीर्णम् ॥३॥

ग्रामेषु पल्लीषु पुरेषु मार्गे क्षेत्रेषु गोष्ठेषु तथा वनेषु ।
प्रकामवर्षानुगतो विनाशं कुर्वन् प्रपेदे भुवनेश्वरं सः ॥४॥

प्रच्छन्नभूते गगने घटाभिः प्रकम्पयन् वृक्षलताः प्रकामम् ।
प्रभूतवर्षान्वितचक्रवातः प्रमाथमाधाद्भुवनेश्वरस्य ॥५॥

उत्तीर्णपाथोनिधिवातजातोऽलंकापथेनोरुरयः पुराऽभूत् ।
उत्तीर्णपाथोनिधिवातजातोऽलंकापथेनोरुरयोऽधुनाऽभूत् ॥६॥

यथा पराक्रान्तगदस्स गर्जन् दृष्टस्समित्यन्तकजातभीमः ।
तथा पराक्रान्तगदोऽद्य गर्जन् दृष्टस्समित्यन्तकजातभीमः ॥७॥

भुवनेश्वरमित्यदः पुरं भुवने केवलनाममात्रकम् ।
भुवनेश्वरमातरिश्वना भुवने नश्वरमित्यदर्शि नः ॥८॥

समीरणकृते रणे समभितो रुतैस्संकुले
विधूततरवारिणा शितशरैस्तरामर्दिताः ।
परास्तमितपत्रिणो विटपिनः कुटीरा गृहाः
समीरणनिपातिता इव रणाजिरे रेजिरे ॥९॥

लूत्वा कदलीपत्रं पुष्पं तोयं फलं किरन् परितः ।
झञ्झावातो मन्ये चक्रे मृत्युदेवतापूजाम् ॥१०॥

अवनमकरोदस्माकं यः पुरा भुवनेश्वरे
स वनहनुमान् वृक्षैश्श्यामैः स्थले निबिडे स्थितः ।
अवनकलिते तस्मिन् स्थाने द्रुमैरवपातितैः
अवनहनुमान् जातस्सद्यस्स्वताताविचेष्टितात् ॥११॥

निर्मीयमाणान्निकषा कुटीरान् अट्टालकान् कुड्यजनाः प्रविश्य।
नष्टास्वपि स्वासु कुटीषु वाते आत्मानमात्मीयजनानरक्षन् ॥१२॥

प्रथमं विद्युच्छक्तिरत्रुटदभितोऽन्धकार आविरभूत् ।
अथ जलवितरणसेवा ततो दूरभाषसंपर्कः ॥१३॥

गृहान्न निर्गन्तुमशक्नुवन् जनाः न दूरभाषैर्लपितुं सुहृज्जनैः ।
पराक्रमेण घ्नति चण्डमारुते श्रुतं न किंचिन्मरुतो रुतं विना॥१४॥

न पर्णकुड्यैर्न कुटैर्न निष्कुटैः न चेष्टिकावप्रगृहैर्न मृद्गृहैः ।
चूनाश्मचूर्णारचितैर्गृहैः परं शैलैश्शिलाभिश्च यथापुरं स्थितम्॥१५॥

क्षुद्राणि भूमौ शयितानि नत्वा तृणानि नोन्मूलयति स्म वातः ।
प्रायेण लोके बलहीनभूताः प्राणन्ति पादे बलिनो निपत्य ॥१६॥

पुरा पुरमिदं कुटैर्बहुकुटैस्तथा निष्कुटैः
बभूव भुवनेश्वरं जनमनोहरं सुन्दरम् ।
हठान्मथितनिष्कुटं पतितवप्रकुड्यच्छदि
चकार तदसुन्दरं प्रबलमारुतो दारुणः ॥१७॥

गोत्रं पवेर्वृत्ररिपोः पुराऽभूत् संत्रायमाणः पवनः पवित्रः ।
गोत्रं विमथ्नन् भुवनेश्वरेऽद्य स्वयं स जातः पवनोऽपवित्रः ॥१८॥

वारुणीं पिबति मर्त्य आसुरीं वारुणीत इत आगतामिति ।
वारुणेक्षणमरुद्द्रुहामिति वारुणत्क्लबिति तद्गृहं मरुत् ॥१९॥

प्रभञ्जयन् पर्णकुटीरशाखिनः प्रपातयन् स्तम्भततीस्सतन्त्रिकाः।
प्रभञ्जनस्स्वैस्स गुणैररञ्जनः प्रभुर्भवन्नप्यसमञ्जसोऽभवत् ॥२०॥

वात्या धूतैश्श्लथकचभराः नर्तने पर्णलाग्रैः
शाखाबाहाकृतविचलनैश्शाखिनो लास्यवन्तः ।
मूलैरुन्मूलनसुविशदैस्ताण्डवोद्युक्तपादाः
भूताविष्टा इव विदधिरे भीमपैशाचवृत्तम् ॥२१॥

निगूह्य गाढावरणे गृहे निजं रिरक्षिषूनेष समीरणो रणे ।
शितैस्तिरश्चीनशरैर्जवेरितैर्गवाक्षतोऽन्तर्गृहमप्यपीडयत् ॥२२॥

कश्चिद्दीनो मथितसदनो निर्दयं दैवमूचे
कश्चित्प्राज्ञः फलितमगृणादच्युतानन्दवाक्यम् ।
कश्चिन्मूढश्शुचमपनयन् मद्यपानं वितेने
कश्चिद्यत्नं गृहमुपवनं किचिदुद्धर्तुमाधात् ॥२३॥

पर्यावरणरक्षायै पादपच्छेदरोधिनम् ।
भञ्जन्ननोकहं नैकं विधिं विधिरलंघयत् ॥२४॥

महान्तं वृक्षमाश्रित्य बहवो वीरुधः क्षुपाः ।
वातवेगं सहन्ते स्म तद्वृक्षपतनावधि ॥२५॥

तस्मिन् वृक्षे ततो भूमौ वातेन विनिपातिते ।
पत्याविव मृते सत्यः विनेशुर्वीरुधः क्षुपाः ॥२६॥

लक्ष्मीपूजामण्टपास्तत्र रेजुर्लक्ष्मीमूर्तिः पूज्यमानाऽऽस यत्र ।
वाते भग्ना मण्टपा मूर्तयश्च जाता लक्ष्म्या हन्त पूजाऽप्यपूर्णा ॥२७॥

क्रन्दति बन्धुवियुक्तो विन्दति दुःखं विनाशितावसथः ।
निन्दति निजदौर्भाग्यं नन्दति कुणपः परं तृप्तः ॥२८॥

गोत्रघ्नकोपेन दिवः पतद्भिः गोष्ठेषु नष्टेष्वतिवृष्टिपातैः ।
गोपायितुं गास्सहबालवत्साः गोपास्तु दीना अभवन्नशक्ताः ॥२९॥

मृतेषु वत्सेषु विवत्सभूताः मृग्यन्ति गावः परितस्स्ववत्सान् ।
मृतासु गोषु स्वजनीवियुक्ताः मृग्यन्ति वत्साः परितस्स्वमातॄः ॥३०॥

अनवरतमथार्णैरन्तरिक्षात्पतद्भिः
स्थलमधि यदकस्मादर्णवः प्रादुरासीत् ।

अवट भुवि ततास्तत् पर्णशाला निमग्नाः
क्वचन पृथगभूवन् पर्णसाभा निवासाः ॥३१॥

वप्रः पाती द्रुमः पाती मिथः श्लिष्टावतिष्ठताम् ।
आधारः कः क आधेयः इति संदिदिहे जनः ॥३२॥

स्तम्भैश्च तन्त्रीसहितैर्द्रुमाणां स्कन्धैश्च मार्गान् पतितैर्निरुन्धन्।
आचार्यकं सोऽधित बन्धतन्त्रे विशृंखलानामनिलः खलानाम् ॥३३॥

स्कन्धं छिन्धि दलं दल क्षिणु तरुं मूलं समुन्मूलय
वप्रं भिन्धि हरच्छदिं क्षिप कुटीं तन्त्रीततीर्निस्त्रुट ।
स्तम्भं पातय गोष्ठमाजहि पथो रुन्धि क्षतिं कारय
व्याघूर्णन् भुवनेश्वरेऽकुरुत किं किं वा न झञ्झामरुत्॥३४॥

महीरुहे मर्दनभिन्नमस्तके महापथे पातितपादपाकुले ।
महानभूत् त्रास उदीक्षकेक्षणे महारुते जृम्भति चण्डमारुते ॥३५॥

तन्त्रीभिराबध्य तरून्निपात्य स्तम्भानवक्रान् विनमय्य लौहान् ।
उत्क्षिप्तकुड्यच्छदिरक्रमेण चक्रे न किं किं हतचक्रवातः ॥३६॥

विद्युत्स्तम्भाः पातिता मार्गमध्ये
यातायातं स्तम्भयन्ति स्म दानैः ।
यानोपर्यप्यत्र दृष्टाः पतित्वा
स्तम्भा वृक्षा विक्षतिं कारयन्तः ॥३७॥

गम्भीरतोयह्रदभूतगर्ताः वीथ्यो बभूवुर्जलवाहिनद्यः ।
कथानके न श्रुतपूर्वमेतत् भयानकं यद्भुवनेश्वरेऽभूत् ॥३८॥

एवं दिने द्वेऽप्यविरम्य वात्वा शनैश्शनैश्शान्तिमियाय वातः ।
पातस्तु वृष्ट्या अनुबध्यमानः पश्चात्क्रमेण प्रशमं जगाम ॥३९॥

परं कुतश्शान्तिरतः परञ्च पराहतानां हतचक्रवाते ।
गृहा न केषांचन ये सगेहाः तेषां पुनर्जीवनमास कष्टम् ॥४०॥

न तोयमूर्जा न पयो न खाद्यं जाता वणिग्भिः पिहिता विपण्यः।
कृष्णापणे दीनजनैस्तु किंचित् कार्षापणैः क्रेतुमभूदशक्यम् ॥४१॥

न वाहवाहेन्धनवाहमार्गाः न क्रीणनं वस्तुन आपणेषु ।
गवां शरीरं शतशो मृतानां श्वानोऽश्नुवानाः पथि हन्त दृष्टाः ॥४२॥

मनोहरोद्यानवृता निवासाः पानीयमूर्जा परिवाहसेवा ।
मार्गस्स गम्यो विपणिस्सुरम्या यथापुरं सर्वमितः कदा स्यात् ॥४३॥

परिशिष्टम्

गतिमतिकरुणामेतामतिमात्रं खिन्नोत्कलस्य विलोक्य ।
पतिमनुयुङ्क्ते गौरी शितिकण्ठ कथमिदमित्थमिति ॥४४॥

गौरीं शंकर ऊचे दयितेऽत्रत्यास्तवैव दुर्गायाः ।
स्पर्धाशीलाः पूजां मूर्तिं संस्थाप्य मण्टपे दधते ॥४५॥

दधते न भक्तिगानं त्वयि वा भक्तितः श्रीसरस्वत्योः ।
आडम्बरेण दधते गानं चलचित्रगानानाम् ॥४६॥

मातेव तथाऽपि सुतान्ताननुगृह्णासि त्वं सदा सदया ।
एधितसम्पद एवम् एतेऽत्रापोढकर्तव्याः ॥४७॥

वेदाध्ययनं विप्रो न करोति न वा वैदिकं कृत्यम् ।
यज्ञा होमास्त्यक्ताः मुच्यन्तां कथमृणात् त्रिविधात् ॥४८॥

गीताचार्येणोक्तं नरमुपदिशता परमपुरुषेण ।
देवान् भावय यज्ञैस्ते देवा भावयेयुस्त्वाम् ॥४९॥

अन्योन्यभावनाभिः श्रेयः प्राप्स्यन्ति सुरा अपि नराश्च ।
दत्तमदत्वा तेभ्यस्तेनो हि भवेन्नरो भुञ्जन् ॥५०॥

तेन स्तेना एते दोषेणाभावनेन जातेन ।
निजिघृक्षद्भिर्देवैः करुणां नीता दशामेवम् ॥५१॥

बुध्वा स्वकृतं दोषं मन्ये भाविनि मानवा अत्रत्याः ।
वेदे यज्ञे होमे वेदाध्ययने च तत्परास्स्युः ॥५२॥

सुन्दरराजस्सुकविः सुरगणकलितामुत्कलस्य शुचम् ।
सुतरां सूक्ष्मधियैक्ष्य सुरकोपस्य कारणं व्यवृणोत् ॥५३॥

×××

अहो ! दौर्भाग्यमुत्कलानाम् !

(प्रो० हरिश्चन्द्र रेणापुरकरः, गुलबर्गा)

अत्यन्तभीषणभयानकचक्रवातः
सामुद्रिकोग्रविकरालकरालझञ्झा ।
अर्धाधिकोत्कलभुवं जलधेस्तटीयां
ध्वस्तीचकार नितरां सहसाऽनपेक्षम् ॥१॥

प्रक्षुब्धसागरतरङ्गमहोर्मिवृन्दै-
र्झञ्झाऽनिलेन बहवो च महाजवेन ।
उन्मीलितास्तरुवरास्तडितश्च दण्डा
लक्षाधिका वसतयो जलधौ निमग्नाः ॥२॥

उत्पाटिता निवसथाः शतशो हि पूर्णाः
ग्रामाश्च निर्जनसमा अभवन्ननेके ।
राज्यस्य पञ्चदशसंख्यकमण्डलेषु
घोरोग्रभीषणतमः समभूद्विनाशः ॥३॥

उत्तालतुङ्गविकरालमहोर्मिजालै-
र्नीताः प्रवाह्य शतशः पशवो मनुष्याः ।
व्यापादिताः कतिसहस्त्रजना यथार्थं
ज्ञातुं न शक्यमिह तस्य जलाप्लुतत्वात् ॥४॥

अत्यन्तभीषणभयङ्करपूरहेतोः
सम्पर्कसूत्ररहिता विषयान्यभागैः ।
यातेषु सप्तदिवसेष्वपि तत्र सन्ति
ग्रामाः सहस्त्रयुगला इति भीषणाऽऽपद् ॥५॥
एकाकितज्जगतसिंगपुराख्यभागे
प्राणैर्वियुक्त इह सप्तसहस्त्रलोकः ।

सर्वत्र सञ्चितजलापगमाद् भवन्ति
नूनं शवाः प्रकटिताः शनकैर्मृतानाम् ॥६॥

संख्याविहीनकुणपाः पशुमानवानां
दुर्गन्धपूतिभरिताः परितो विकीर्णाः ।
दृश्यन्त एव नियतेर्ननु दुर्विलासः
तेषां कृते विलपितुं नहि कोऽपि शिष्टः ॥७॥

क्षेत्राणि सस्यभरितानि सुशोभितानि
जातानि सागरमयानि जलाप्लुतत्वात् ।
नष्टं बभूव खलु तेन समस्तसस्यं
तेनोत्कलस्य भवितोग्रतरा समस्या ॥८॥

झञ्झाऽनिलेन तडितः सकलोऽपि दण्डा
उन्मूलिता इति तमोमयमुत्कलोऽस्ति ।
अद्यापि तस्य भुवनेश्वरराजधानी
गाढान्धकारपटले स्थगितेव नूनम् ॥९॥

नानासहस्रमनुजाः पशवोऽप्यगण्याः
दैवीयघोरविपदा ह्यनया विनष्टाः ।
तेषां शवैश्च पतितैर्बहुपूतिगन्धैः
सञ्चारिदारुणगदोग्रभयं हि तत्र ॥१०॥

अस्याश्च घारेविपदः प्रतिकारहेतोः
केन्द्रीयशासनमपीह बभूव सिद्धम् ।
पर्याप्तधान्यधनवस्त्रमहौषधीनां
पूर्तिं विधाय विपदाहतमानवेभ्यः ॥११॥

स्थाने प्रशासनमिमां महतीं विपत्तिं
राष्ट्रीयघोरविपदां प्रकटीचकार ।
कर्तुं च तत्प्रतिकृतिं खलु शासनेन
सज्जीकृता सकलशासनयन्त्रणाऽपि ॥१२॥
सर्वत्र वृक्षपतनाच्च जलावरोधात्
सम्पर्कशून्यमभवत् सकलप्रदेशः ।

साहाय्यकार्यमपि तेन बभूव रुद्धं
लोकार्तिरिव समभूदतितीव्रघोरा ॥१३॥

राष्ट्रीयघोरविपदेति विघोषितत्त्वाद्
आवश्यकान्नवसनादिकवस्तुजातम्।
आयाति भारतभुवः प्रतिराज्यकोणात्
देशान्तरैरपि तथैव विसृज्यते च ॥१४॥

सञ्चाररोध्यगणितैस्तु विशालवृक्षै-
रुन्मूल्य तत्र पतितैः पथरोधकैश्च ।
साहाय्यवस्तुनिवहं परिपीडितेभ्यः
सम्पात्यते च गगनात् खलु वायुयानैः ॥१५॥

दौर्भाग्यपीडितमहोत्कलसाह्यहेतो-
स्तत्रागतैश्च समवायगणैर्विधेयम् ।
आद्यं ह्यसंख्यपशुमानवदेहदाहो
भूमौ निधानमथवा बहु कष्टकार्यम् ॥१६॥

न्यूनाधिकं प्रतिसमं ह्यनुभूयमानं
झञ्झामरुत्प्रबलचण्डमहाप्रकोपम् ।
दृष्ट्वाऽपि तत्प्रतिकृतिं न विधाय काञ्चित्
प्रान्तीयशासकजनैरपराद्धमेव ॥१७॥

हे भूतभावन ! विभो ! भवतापहारिन्
संसाररङ्गनटनाटनसूत्रधार ! ।
सर्वस्वलुप्तपरितप्तहतोत्कलीयान्
संरक्ष तारय कृपां कुरु देवदेव ! ॥१८॥

जेवरगी निवासः,
हॉटेलपरिवारस्य पृष्ठतः
गुलबर्गा

१९-११-१९९९

कलिङ्ग-प्रकम्पनः

डॉ० शशिनाथ झा, दरभंगा

अकस्मात् प्रचण्डो हि वायुः कलिङ्गे
धरा भीतभीता यथा विस्फुलिङ्गे ।
न वृक्षाः सहायाः स्वयं लुञ्चिताङ्गा
लता मर्दिताः सीदिता वञ्चिताङ्गाः ॥१॥

गृहस्योर्ध्वपाता निपाता विपाता
जनानां पशूनां सदा सन्निपाताः ।
हताः केचिदागारपातैः समन्तात्
महावृक्षपातैश्च केचित् पुरस्तात् ॥२॥

चलद्वातशाखाकशाघातपातैः
प्रचण्डप्रभञ्जप्रवेगाधिघातैः ।
नराली गवाली मृगाली विपन्ना
सदा सा खगाली न दृष्टा निषण्णा ॥३॥

महावातचक्रेषु बुद्धिर्हता हा
महाभूतसंक्षोभसम्पद् गता हा ।
तदैवागता हन्त झञ्झा कराला
विपत्तौ विपच्चैव हा हा विशाला ॥४॥

न यानं न गेहं न मार्गो न वस्त्रम्
न खाद्यं न पेयं न वा चैव शस्त्रम् ।
न बुद्धिर्न शुद्धिर्न वा कोऽप्युपायः
न कस्यापि कोऽपीह दृष्टः सहायः ॥५॥

विपद्दैवदत्ता महाभीतिसत्ता
अहा हा तथापीह जीवस्य सत्ता ।
तदायाति ज्ञानं न रक्षास्ति शक्या
अतश्चेश्वरस्यैव सत्ता विवेच्या ॥६॥

अघोरे कलौ घोरकर्मप्रभावः
प्रकृत्याः प्रकोपो न केनापि वार्यः ।
स्वतः शान्तिमेतीह संक्षोभनाशे
समाप्तेन्धनोऽग्निः शमं याति सद्यः ॥७॥
समुद्रे जलाग्निर्महावातमित्रं
स्वतः क्षोभकाले करालो न चित्रम्।
स्वतः सौम्यमूर्त्तिर्जगत्त्राणकारी
सदा सर्वजन्तुप्रणम्योऽविकारी ॥८॥
त्रिभिश्चैव वारैः स शान्तो नभस्वान्
इतो जीविता निस्सहायाश्च केचित्।
मृता जीवसंघास्तु दुर्गन्धयुक्ताः
निराधारजीवस्य प्राणान्तकाराः ॥९॥
ततः शासकानां परेषाञ्च तत्र
प्रवेशः सुशक्यस्तदालम्बभूतः ।
स्वदेशो विदेशः परे वा सहायाः
विपत्तौ जनानां न के वा दयार्द्राः ॥१०॥
अहो ईश्वर ! त्वं हि कारुण्यशीलः
कथं वा विभीषाकरोऽभूर्जनानाम्।
मतो वाथ किं निर्विकारः स्थविष्ठः
सुखं वाथ दुःखं हि कर्मप्रभावः ॥११॥
पुनः स्वास्थ्यलाभः कलिङ्गे प्रभूतः
स्वतः सर्ववस्तुप्रतिष्ठा भवित्री ।
सदा जीवतां शं भवेच्चैव तत्र
मृतानां कृते शोकश्रद्धा बहुत्र ।१२॥
अहो मङ्गलं सङ्गतं तत्र भूयात्
सदा सज्जनानां गतिस्तत्र यायात् ।
सदाशारतानां सदा सारवत्त्वं
कलिङ्गप्रजानां सदाशा-रवत्वम् ॥१३॥

कारगिल-विजयः

–डॉ० शशिनाथ झा
व्याकरणविभागः,
का०सिं०द० संस्कृतविश्वविद्यालयः, दरभंगा

देशस्वातन्त्र्यपुंसः प्रमदविलसने मोहिका दुष्टनीतिः
पाकं चापाकदेशं सहजमलिनकं गर्भतोऽमुञ्चदेषा ।
इत्थं दुर्नीतिजोऽसौ पितरि हितकरे भारते दुष्टबुद्धि-
र्जन्मादेरेव जातः हितरहितमतिर्भारताल्लब्धसत्त्वः ॥१॥

वारं वारमुदारभारतभुवं यो व्यर्थमाक्रामति
पक्षौ पार्श्वबलौ हि यच्छलबलौ सत्त्वापकर्षप्रदौ ।
पृष्ठाक्रामककातरो गिरिगुहामार्गाश्रितश्चौरवत्
निश्येवाक्रमणं निशाचर इव भ्रष्टा मतिर्यस्य हा ॥२॥

वार्ता च विफला यस्य वातुलस्येव सर्वदा ।
मिथ्यावादो हि पाकस्य शपथो विपथायते ॥३॥

बाङ्ग्लादेशोदयादेव जातामर्षः स भारते ।
काश्मीरं हि पृथक्कृत्य ग्रहीतुं प्रतिवाञ्छति ॥६॥

सन्त्यज्य सर्वं हि विकासकार्यं
दीनाः प्रजाश्चाविगणय्य नित्यम् ।
विस्फोटकास्त्रक्रयणे बले च
शक्तिं समस्तां क्षपयत्यशक्तः ॥५॥

उग्रवादप्रतिष्ठाविधौ भारते
गुप्तरूपेण संवर्धनेऽसौ रतः ।
छद्मना चैव काश्मीरसीमान्तरे
कार्गिले पर्वते सैन्यघट्टं व्यधात् ॥६॥

इतो हि भारतावनौ दलेषु वैमनस्यरुक्
तथोग्रवादिपामरैः प्रसारिता विडम्बना ।
पयोमुखो वराक-पाक-शासको विषान्तरः
स्वमित्रतार्थमाह भारतेन सन्धिरिष्यते ॥७॥

अबुद्धवृत्त-भारतेन पाकवार्तया भृशं
सुबुद्धिदानहेतवे प्रयास आश्रितः सदा ।
सहस्रफेनिलैर्यथा न कम्बलेऽस्ति शुभ्रता
तथैव पाकदुर्मतेर्मतौ न सद्विचारणा ॥८॥

अत्रान्तरे महावीरा भारतीयाः सुबुद्धयः ।
दृष्टवन्तः पाकसैन्यान् छद्मना सद्मनि स्थितान् ॥९॥

तृणे लुक्कायितो वह्निर्न चिरं गोपितो भवेत् ।
क्षणान्निर्गतधूमेन लक्ष्यते संकलैर्जनैः ॥१०॥

उच्चैरुच्चैर्विततशिखरे क्रूरपाका विपाका
भीष्मास्त्रैस्ते सततगतयः प्रेतराट्तुल्यरूपाः ।
नीचैर्नीचैर्गिरितटगता भारता मार्गमाणा
हा हा चेत्थं विषमसमरे बर्बरैर्घातितास्तैः ॥११॥

तदीयास्त्रनिर्भिन्नसैन्यान् समीक्ष्य
सकोपाः सशस्त्रा समे वीरसिंहाः ।
स्वपार्श्वस्थशृङ्गे गरुत्मानिवागुः
ततस्तत्र पाकान् विधर्तुं समर्थाः ॥१२॥

नानाचिह्नैः चिरपरिचिताः पाकपुष्टा वराकाः
पाकात् त्यक्ता अपरिचितचराः पृष्ठबन्धं सुबद्धाः ।
पश्चात् पाके परिचिततया स्वीकृते भारतेन
निर्भत्स्यैव प्रकटितदयार्द्रेण मुक्ता निरीहाः ॥१३॥

'विंश्याः शताब्द्या अन्ते हि कारगिल्-युद्धमागतम्।
तत्रात्मानं निपात्यापि देशरक्षाकरा भटाः ॥१४॥

अमरा वन्द्यमानास्ते भारतीयैः सदादृताः ।
श्रद्धाञ्जलिश्च तेभ्योऽत्र भूयो भूयो वितीर्यते' ॥१५॥

ये वीरा विजयं प्राप्य देशरक्षाविधौ स्थिताः ।
तेऽभिनन्द्याः सदा वन्द्याः तेभ्यो भूयो नमो नमः॥१६॥

सम्मुखवीरविजयतः पृष्ठाक्रामकरिपुविजय एव धन्यः ।
कालः परिहरणीयः तमसो गेहे त्वहिरेव सर्वत्र ॥१७॥

उग्रवादो भृशं निन्द्यः, कातरः परपूजकः ।
तज्जयः कारगिल् क्षेत्रे देशस्तेन प्रसीदति ॥१८॥

॥ नव ख्रीष्टाब्दीये (२०००) शुभकामना ॥

कालः कल्पान्तकारी कलयति जगतीं जीवनस्यायुरेतत्
वर्षं तस्यैकखण्डं भवति सुविदितं कर्मभिस्स्वेन युक्तैः ।
दुर्बुद्धेरुग्रकर्मप्रशमनकरणे सौमनस्यप्रसारे
आतङ्कात् त्राणदाने कवचहरमिदं नूतनं वत्सरं स्यात् ॥

–आचार्य चन्द्रदीप शुक्लः
राष्ट्रपतिपुरस्कारसम्मानितः
सम्पादकः 'सारस्वतम्', बाहरी बेगमपुर, पटना सिटी–९

श्रीमन्तः सम्पादक महोदयाः ।

आदरेण नमस्काराः ।

नवोल्लासो नवो हर्षो वयो नवं क्षणं नवम् ।
नवः कालो नवो मासः शुभं वर्षमिदं नवम् ॥

नववर्षस्य शुभकामनासहितः

भवच्छुभेच्छुकः

प्रभात कुमार शर्मा
प्रबन्धसम्पादकः 'संस्कृतप्रचारकम्'
शाखाकार्यालयः
105 (HPU) Teacher's Hostel
Summer Hill, Shimla (H.P.) Pin : 171005

कार्गिलम्

–डॉ० रवीन्द्रकुमार पण्डा
संस्कृतपालिप्राकृतविभागः, कलासंकाय : म०स० विश्वविद्यालयः,
बडौदा-३९०००५ (गुजरात)

वन्दे शिवं मधुरमंगलमुग्धमूर्तिं
सर्गस्थितिप्रलयकारणकार्यरूपम् ।
दीनार्त्तदुःखतटिनीतटसेतुबन्धं
मोहान्धकारकलिकालकलाविलासम् ॥१॥

वन्दे शिवां शिवशरीरसमस्तशक्तिं
भक्त्या जगद्धितमयीं मदमोहहन्त्रीम् ।
काले करालसमये शुभमङ्गलाय
वन्दे च मे जननभूजननीं सभक्ति ॥२॥

नमामि भक्त्या परमं पितामहं
भजामि देवीं परमेश्वरीं सुखे ।
स्मरामि रामं भवभीतिनाशकं
विनाशकं दैत्यशिरोमणेः रणे ॥३॥

काव्यं करोमि सरलं सुखदानहेतोः
संदर्शनाय खलु भारतवीरकीर्त्तिम् ।
यैः सैनिकैः निजसुखं परिहाय प्रेम्णा
दत्तानि जीवनधनानि धराजनन्यै ॥४॥

ते वीरविज्ञपुरुषाः कथयन्ति लोका-
स्ते शान्तशीतलधरातलसूर्यकल्पाः ।
ते शाश्वता दशरथाः निजदेशहेतौ
प्राणान् विहाय विलसन्ति विशालनाके ॥५॥

तेषां कृतिं प्रथयितुं प्रणयाकुलं मे
चित्तं करोति कठिनान्विविधान्प्रयत्नान् ।
तेषां पवित्रमथ संस्कृतिधर्मकार्यं
देशे प्रसारयितुमेव मम प्रयत्नः ॥६॥

जानन्ति यद्यपि कथां, विविधानुदन्तान्
लोका विचारकुशला विबुधाः वरेण्याः ।
दृष्टाः श्रुताश्च सकलं नवभोगयन्त्रैः
काव्यं करोमि च तथापि सुखाय मात्रम् ॥७॥

नित्यं प्रजीवतु सनातनसत्यकीर्त्तिः
संवर्धतां प्रतिपदं मम देशभक्तिः ।
पूज्या सदैव भवतु प्रणयेन साकं
शान्ता स्वदेशजननी जननीसमाऽऽया ॥८॥

देशेऽद्य शक्तिः, शुभभक्तिभावाः
वीराग्रगण्याः पुरुषाः महान्तः ।
न धर्मनीतिः शिथिलाऽस्ति देशे
कथं भवेदेव पराभवो नः ॥९॥

आयाति यातीह सदा विपत्तिः
धीराश्च धैर्येण सदा रमन्ते ।
स्वतः स्वकाले गलतीह दुःखं
तथापि चिन्ता गिलतीव चित्तम् ॥१०॥

विनाशकानाञ्च विनाशभीत्या
भयंकराणां भयभावरीत्या ।
जनाश्च देशे नवरोगरक्ताः
चिन्ताजडास्ते विचरन्ति शालाः ॥११॥

भवेदहो किं घटनं प्रचण्डं
नश्यत्यहो भारतभूषणश्रीः ।

चण्डाः प्रचण्डाश्च बलेन भूमिं
विदारयिष्यन्ति च कौशलेन ॥१२॥

भयेन भूमिश्च सदा प्रतप्ता
तथापि भीताः निवसन्ति लोकाः ।
स्थानेऽद्य यस्मिन् विचरन्ति भीमाः
विनाशनार्थं मम देशभूमेः ॥१३॥

काश्मीरराज्ये सुलभा न शान्तिः
स्थाने प्रधाने विलसन्ति दुष्टाः ।
शिष्टाः समस्ताश्च भयेन यत्र
दिवानिशं कातरभावमग्नाः॥१४॥

सम्प्रार्थयन्ते जगदीश ! रक्ष
रक्षस्व नित्यं मम देशभूमिम् ।
विनाशकानां वस कण्ठदेशे
अधर्ममार्गात् विरमन्तु भीमाः ॥१५॥

हिंसातुराणां न च काऽपि भीतिः
इयं हि तेषां चलनस्य रीतिः ।
भवन्ति भीत्या सरलाः विनम्राः
युद्धस्य नीतौ न च ये सुदक्षाः ॥१६॥

नेच्छन्ति युद्धाय च शान्तचित्ताः
अन्यायमार्गे चलितुं न शक्ताः ।
असत्यरीत्या हरणाय भीता-
स्ते भारतीयाः बलिनो भवन्ति ॥१७॥

अधुना धरणी जननी विकला
परपीडनदुःखमयी सरला ।
रुदतीव सखे ! हृदये तरले
वदतीव नवं करुणं व्यथनम् ॥१८॥

नगरे नगरे गगने पवने
व्यथनस्य कथा वहतीह वने ।
हृदयं दयनीयदशाविवशम्
जननी च भये वद कस्य फलम् ॥१९॥

दहनं दहतीह मनः सततम्
शरणं वद कस्य सखे समये ।
करणीयमिह प्रलये किमिदम्
नयने नयने नवदुःखलिपिः ॥२०॥

दिवसे दिवसे घटना जटिला
शयने सततं घटना चपला ।
मम भारतमातुरनन्तनिधेः
परिरक्षणमेव सदा भवतात् ॥२१॥

सर्वदा भारता माता वीरमातेति कथ्यते ।
वीराणां जननी यस्मात्तस्मादेव गरीयसी ॥२२॥

अस्माकं भारता भूमिः वीरभूमिश्च गीयते।
वसन्ति सुतरां स्नेहे देशेऽस्मिन् भारते सुराः ॥२३॥

असुराणां विनाशायं सर्वदा वीरपुङ्गवैः ।
स्वजीवनानि दत्तानि विना द्विधां सगौरवम् ॥२४॥

विजयेन विना का श्रीः विजयेन विना च किम् ।
गौरवं भारतीयानामहिंसाव्रतधारिणाम् ॥२५॥

अस्माकं भारतीयानां धर्मशक्तिः समुज्ज्वला ।
धर्मस्य विजयोऽवश्यं भविष्यत्यैव भारते ॥२६॥

मूले तिष्ठति धर्मस्य सत्यं सनातनं सदा ।
सत्येन तिष्ठति सर्वं भुवनं सचराचरम् ॥२७॥

सत्यस्य स्थापना युक्ता सत्यस्य परिरक्षणम्।
अवश्यं करणीयं तत् प्रकारैर्विविधैर्नवैः ॥२८॥

असत्यमन्यथा स्याच्च भूत्वा सत्यायितं भुवि।
अनुजा भविष्यन्ति नो दुःखिताः पीडिताश्च तैः॥२९॥

अस्माकं यास्यति भूमिर्यास्यति दीर्घगौरवम्।
कथयिष्यन्ति ते दुष्टा वयं हि प्राणकातराः ॥३०॥

परन्तु तेषां सकला प्रकल्पना
कदापि भूमौ न सुखे फलिष्यति।
असत्यमार्गे रिपवोः विनाशकाः
प्रयासबद्धाः सततं भवन्तु ते ॥३१॥

सत्यस्य मार्गे विचरन्ति ये सदा
ये धर्मनीतौ च सदाऽभिलाषिणः।
यच्छन्ति सानन्दमिह स्वजीवनं
हिताय देशस्य सदा सुपूजिताः ॥३२॥

अस्माकं पुरुषा वीराः न युद्धभयकातराः ।
जीवनानि जलीकृत्य संग्रामरतसैनिकाः ॥३३॥

सगर्भां सरलां पत्नीं सुपुत्रं प्रियसोदरान्।
परिवारं परित्यंज्य संग्रामभूमिवेष्टिताः ॥३४॥

अजय आहुजा वीरः जीवनं दत्तवान् सुखे।
संरक्षितुं स्वदेशस्य गौरवं नवसंकटे ॥३५॥

नचिकेता तथा वीरः शार्दूलः रणनायकः।
विनाशाय च शत्रूणां प्रविष्टः सङ्कटस्थले ॥३६॥

सत्यस्य सरणं कृत्वा चास्माकं वीरपुङ्गवाः ।
अर्पयन्ति रणे पश्य जीवनानि विचक्षणाः ॥३७॥

देशेऽद्य दुःखे विचरन्ति मानवाः
विनाशचिन्ता प्रबला मनस्तले ।
सर्वत्र दुःखस्य करालकालिका
विनाशनाय भ्रमतीव भूतले ॥३८॥

भयेन युद्धस्य प्रकम्पिता मही
प्रकम्पते वै हृदयं प्रतिक्षणम् ।
किमद्य जातं सहसा कुचिन्तया
दिनानि यास्यन्ति सुचिन्तया विना ॥३९॥

विनाशमार्गे गमनाय तत्पराः
विचारहीनाः रिपवो भयङ्कराः ।
देशस्य हानेश्च न चिन्तने क्षमाः
भ्रमस्य भूमौ विचरन्ति केवलम् ॥४०॥

कलेन वा कौशलकारणेन वा
छलेन कूटेन बलेन वा पुनः ।
बहुप्रकारैः समग्राभिलाषिणः
प्रयत्नयुक्ता रिपवो विचक्षणाः ॥४१॥

अनेके सैनिकास्तत्र प्राणस्नेहविवर्जिताः ।
विलुप्ताः कुत्र भूखण्डे देशसेवापरायणाः ॥४२॥

किं वा प्रपीडितास्सन्ति पाकिस्थानिकसैनिकैः ।
किमुत मारितास्सन्ति सत्यं कः कथयिष्यति॥४३॥

जेनेभाविधिमुल्लङ्घ्य पाकिस्थानस्य सैनिकाः ।
अस्माकं वीरपुत्राणां क्रीडन्ति वपुभिः सह॥४४॥

किं वा ते बन्दिनस्सन्ति कारागारेषु तत्र वा।
किं तेषामस्थिमांसादि मिश्रितं मृत्तिकारसैः ॥४५॥

अथवा मेऽमृताः जाताः मारित्वा मृत्युराक्षसान्।
शरीराणि प्रक्षिप्तानि मृत्योश्च नवगह्वरे ॥४६॥

ते गताः सकले सत्यं कीर्त्तिस्तेषाञ्च जीवति ।
जीविष्यति चिरं लोके यावच्चन्द्रदिवाकरौ ।।४७।।

म्रियन्ते मानवाः सत्यं मरणं नियतं भुवि ।
संसारे मरणं सत्यं चासत्यं सकलं सखे ।।४८।।

मरणं वासनोच्छेदः मरणं मोहनिर्वृतिः ।
म्रियन्ते देशसेवायां येऽद्य ते पुरुषोत्तमाः ।।४९।।

दुःखस्य विषयश्चात्र देशेऽद्य जनता स्थिरा ।
केवलं शृणोति सर्वं चित्राणि पश्यति वृथा ।।५०।।

देशेऽद्य भीषणो वह्निरशान्तिर्दुःखमेव च ।
कारणेन विना वीराः म्रियन्ते रणप्राङ्गणे ।।५१।।

न शङ्का विषयेऽस्माकं स्थानं नो धनमेव च ।
कारगीलीति यत्स्थानं प्रसिद्धं भारतावनौ ।।५२।।

कारगिल्यां वृथाऽद्यैव ज्वलति भीषणोऽनलः ।
तयैव चिन्तया दग्धाः समग्राः देशवासिनः ।।५३।।

सर्वत्र समरज्वाला सर्वत्रैव विभीषिका ।
न स्थानमस्ति वा कुत्र यत्राधुना न यन्त्रणा ।।५४।।

गेहेऽद्य भीषणा भीतिर्वहिरेव च सा स्थितिः ।
रसायनास्त्रगर्वेण हुंकारो भयकारणम् ।।५५।।

दिने दिने नवा चिन्ता कलुषीकरोति मनः ।
विहाय सकलं वस्तु कुत्र वा यास्यति जनः ।।५६।।

हिंसातुरा महाघोरा दाम्भिका मदमण्डिताः ।
विचारविमूढाः किञ्चिन्न चिन्तयन्ति कर्कशाः ।।५७।।

चिन्ता हि केवलं तेषां स्वस्वार्थसिद्धिरेव च ।
तदर्थं सरणिस्तेषां रणमेवाद्य केवलम् ।।५८।।

दुःखं पीडयति चित्तं कारणेन विना वृथा ।
म्रियन्ते सैनिकाः श्रेष्ठाः युवानो वीरविक्रमाः ॥५९॥

त एव पुरुषाः श्रेष्ठास्त एव देशरक्षकाः ।
त एव विक्रमादित्याः पुरुषत्वविभूषिताः ॥६०॥

अधुना भारता माता क्रन्दति भयसंकुला ।
ताडयन्ति च तां क्रूराः पाकिस्थानस्य सैनिकाः ॥६१॥

अधमाः शासकाः क्रूराः कठोरहृदयाः नराः ।
रसायनास्त्रगर्वेण गर्जन्ति नरकुक्कुराः ॥६२॥

ताडनाय न वै शक्तिर्न पीडनाय भारतम् ।
केवलमत्र तत्रैव सृजन्ति त्रासभावनाम् ॥६३॥

त्रासयन्ति महामूर्खाः सन्त्रासवादकौशलैः ।
अपहर्त्तुं धरां साध्वीं यतन्ते नरराक्षसाः ॥६४॥

नवीना कस्य वा पत्नी नवोढा प्रेयसी नवा ।
स्मरति स्वपतिं प्रेम्णा कारगिलनिवासिनम् ॥६५॥

सहसा विधवा जाता पत्नी प्रणयकाङ्क्षिणी ।
रुदति सरला बाला निन्दन्ती भाग्यलेखनम् ॥६६॥

कस्य प्रियतमा तन्वी सगर्भा दुःखकातरा ।
कान्तस्य मरणं श्रृत्वा भग्नशीलेव कोमला ॥६७॥

तथापि सरला साध्वी सत्यं जानाति यद्यपि ।
कथयति यथारीत्या चाहं सौभाग्यशालिनी ॥६८॥

पतिर्मे परमो देवः देशस्यार्थे स्वजीवनम् ।
प्रदत्तं श्रद्धया तेन दुःखेन किं प्रयोजनम् ॥६९॥

सर्वत्र सर्वदिग्भागे रौद्रा दुःखस्य डाकिनी ।
अकाले कालिका घोरा भ्रमतीव भयंकरा ॥७०॥

जीवति च पित्रा कुत्र पितामहो महाद्रुमः ।
गच्छति युवकः पुत्रः हा दुःखमद्य भारते ।।७१।।

क्रन्दति जनकः कुत्र पुत्रविच्छेदकारणात्।
कुत्र वा कोमला माता स्वप्राणनाशकाङ्क्षिणी ।।७२।।

दृष्ट्वा चित्रपट्टं गेहे स्मरति कोमला कलिः ।
अधुना वद मे मातः! क्व नु मे वर्त्तते पिता ।।७३।।

बालाया वचनं श्रुत्वा भयेन लोललोचना ।
बधिरा इव सा धीरा धैर्येण सह सादरम् ।।७४।।

कथयति च सा तन्वी तरङ्गहीननिश्चला ।
बाले ! तव पिता श्रेष्ठः प्रगतो मन्दिरं प्रभोः ।।७५।।

बालिका चपला लोला पृच्छति कुत्र मन्दिरम् ।
अहमपि गमिष्यामि मिलितुं पितरं मम ।।७६।।

बोधयिष्यति किं माता दुःखिनी दुःखकातरा ।
याहि त्वमपि तत्स्थानं देशार्थमेव जीवनम् ।।७७।।

मम तु सकलाः स्वप्नाः विनष्टाः देशकारणात् ।
अहमपि गमिष्यामि जीवनेन किमद्य मे ।।७८।।

अन्धस्य नश्यति यष्टिः पङ्गोश्च चरणं द्वयम् ।
बन्धस्त्रुट्यति वा कस्य गम्भीरे दुःखसागरे ।।७९।।

प्रतीक्षाविकला माता ग्रामकोणे प्रतीक्षते ।
आयाष्यति ध्रुवं तस्यास्तनयो वीरविक्रमः।।८०।।

प्रेषयिष्यति वा वित्तं रजःसंक्रान्तिरागता ।
अधीरा भगिनी भग्ना भ्रातुः पत्रञ्च नागतम् ।।८१।।

कस्य प्रणयिनी मुग्धा शोकाग्निदग्धमानसा ।
करोति व्रतसावित्रीं 'सत्य'स्य रक्षणाय सा ।।८२।।

कुत्र वा मन्दिरे माता प्रतिदिनं प्रयच्छति ।
कुसुमबिल्वपत्रादीन् भयार्द्रभक्तिमानसा ॥८३॥

करोति जननी कुत्र प्रतिमूहुर्त्तमेव च ।
सुरक्षार्थञ्च पुत्राणामीश्वरनामकीर्त्तनम् ॥८४॥

त्वमेव मे पिता माता हे प्रभो ! परमेश्वर !।
सन्तानं रक्ष मे नित्यं कृपया वरदो भव ॥८५॥

पुत्रो मे करोति युद्धं ड्रासेऽद्य दुःखजर्जरः ।
भवानि! त्वं सदा मातः समीपे भव सर्वदा ॥८६॥

नश्यन्तु प्रबलाः विघ्नाः सकलाः प्रतिबन्धकाः।
ये तिष्ठन्ति तदा सर्वे तस्य संग्रामकालिकाः ॥८७॥

हे मधुसूदन ! कंसाः प्रबलाश्चाद्य भारते ।
आगच्छ, आगच्छ भूमिं विनाशय च दुःशीलान्॥८८॥

त्वमेव दुःखहर्त्तासि त्वमसि प्राणदायकः ।
त्वमेव जगतो नाथः भारतं रक्ष सर्वदा ॥८९॥

सैनिकानां सुमेधानां देशप्राणपरायणाम् ।
त्वमेव साहसशक्ती देशस्य कुरु मङ्गलम् ॥९०॥

आगच्छतु स्थिरा शान्तिर्नश्यतु रणताण्डवः ।
भाण्डाः गच्छन्तु मद्देशात् प्रविष्टा ये च शत्रवः ॥९१॥

येषां कृते वयं नष्टा विनष्टाश्चाद्य भारते ।
हसन्ति प्रविशन्ति येऽस्माकं भारतभूतले ॥९२॥

कपटे कुशला ये च भेदबुद्धिपरायणाः।
अस्माकं नाशमिच्छन्ति ते नश्यन्तु प्रतिक्षणम्॥९३॥

अस्माकं वीरपुत्राणां विजयनाददुन्दुभिः ।
गगनं पवनं शून्यं प्रकम्पयतु मेदिनीम् ॥९४॥

हसतु धरणी माता सगर्वं चैव सर्वदा ।
वीरतनयलाभस्य कारणमिदमुत्तमम् ॥९५॥

अहिंसा परमो धर्मोऽहिंसा च परमं तपः ।
अहिंसा साधना श्रेष्ठा अहिंसा सुखसाधनम् ॥९६॥

हिंसा नाशयति प्रीतिं पारस्परिकमित्रताम् ।
नाशयति च सा बुद्धिं प्रज्ञाविवेकशालिनीम् ॥९७॥

जीवहिंसा महापापमहिंसा सुखदायिनी ।
अहिंसासदृशा नीतिर्नास्त्यैव विश्वभूतले ॥९८॥

हिंसायां म्रियते जीवोऽधोगतिश्चाथ हिंसने।
अहिंसायां सदा शान्तिः सुखानि निर्मलानि च॥९९॥

हिंसा व्यालीव दशति हिंसा दुःखस्य कारणम्।
हिंसायां न हि चानन्दः केवलं दुःखभीषणम्॥१००॥

भोगस्य संगिनी हिंसा सा च रोगस्य नायिका।
असत्यस्य मूले हिंसा हिंसा कंसस्य कल्पना ॥१०१॥

अहिंसा जटिलं तथ्यं चाहिंसा सरला कला ।
अहिंसासदृशी भक्तिर्नास्ति नास्ति महीतले ॥१०२॥

नाशयति बलं रौद्रा बर्धयति च शत्रुताम् ।
मित्रता क्षीयते नित्यं हिंसया द्वेषशङ्कया ॥१०३॥

यदि सुखं विना हिंसा हिंसायाश्चरणेन किम्।
अहिंसास्त्रसहायेन मिलति सकलं यदि ॥१०४॥

अस्माकं वीरपुत्राणां मरणं दुःखदायकम् ।
किं करणीयमत्रैव शरणं जगदीश्वरः ॥१०५॥

तेषाञ्च सैनिकाः दक्षाः म्रियन्ते चाधिकाः सदा।
तथापि शासकास्तेषामाक्रमणाय चञ्चलाः ॥१०६॥

आक्रमणेन को लाभः किं फलं रणसर्जने ।
गौरवमस्ति किम्वाऽत्र को लाभस्त्रासवर्धने ॥१०७॥

निन्दन्ति सकला देशाः पाकिस्थानस्य दुर्नयम्।
तथापि रणहुङ्काराश्चापल्यादेव केवलम् ॥१०८॥

पाकिस्थानं यथार्थेन त्रासवादीति कथ्यते ।
उल्लंघन्ति यथास्वार्थं यथेच्छं नियमांश्च ते ॥१०९॥

भारते प्रखरा शक्तिः दुर्गारूपेण संस्थिता ।
सरस्वती महाशक्तिर्बुद्धिरूपेण वर्त्तते ॥११०॥

प्रचण्डा चण्डिका नित्यं विलसत्येव भारते ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥१११॥

धर्मसंस्थापनार्थाय युगे युगे युगेश्वराः ।
आविर्भवन्ति दुष्काले संरक्षणाय भारतम् ॥११२॥

भारते लसति लक्ष्मीर्धनरूपेण सर्वदा ।
संरक्षिष्यति चावश्यं भारतं परपीडनात् ॥११३॥

महाकाली कराला या विद्यते भारतावनौ ।
महाशक्तिश्च सा देवी प्रमादं प्रहरिष्यति ॥११४॥

विनश्यतु धनं धान्यं जीवनं जनसम्पदः ।
अवश्यं कार्यमस्माभिः शत्रूणां दर्पमर्दनम् ॥११५॥

नास्माकं विजये श्रद्धा नोल्लासः परपीडने ।
परन्तु विषवृक्षाणां कर्त्तव्यं मूलताडनम् ॥११६॥

विनष्टा यदि नो सर्पा विषवृक्षनिवासिनः ।
दङ्क्ष्यन्ति सुगमे काले दंशनं हि स्वभावजम् ॥११७॥

दंशनेन हि सन्तोषः सर्पाणामिह सर्वदा ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥११८॥

मदमत्ताश्च ये मोहेनाज्ञानतमसातले ।
त्रासयन्ति सदा मोदे दण्डनीया भवन्तु ते ॥११९॥

येषां नास्ति स्वयं प्रज्ञा बोद्धुं न पारयन्ति ते ।
हिताहितविचाराश्च तेषां नायान्ति मानसम् ॥१२०॥

ते वीराः सततं पूज्याः वरेण्याः भीमविक्रमाः।
सुखे दुःखे च ये स्थिराः देशस्य हितचिन्तकाः॥१२१॥

सैनिकाः सकलं त्यक्त्वा रणप्राणपरायणाः ।
अन्यथा वद को मार्गः भारतं शत्रुसंकुलम् ॥१२२॥

पवित्रा भारता माता भविष्यति न खण्डिता ।
केवलं वीरपुत्राणां पराक्रमबलेन सा ॥१२३॥

सर्वेषु देवदेवीषु श्रेष्ठा स्वदेशमातृका ।
सर्वाग्रे पूजनीया सा सर्वदुःखविनाशिनी ॥१२४॥

धर्मेषु श्रेष्ठधर्मो हि मन्मते देशसेवनम् ।
देशसंरक्षणकार्यं कठिनं दुष्करं व्रतम् ॥१२५॥

विनष्टा नगरी बुरुः समृद्धा सस्यशालिनी ।
आक्रमणफलादेव श्मशानमिव भासते ॥१२६॥

सुन्दरी नगरी तन्वी याऽधुना ध्वंसताण्डवैः ।
विनष्टा वर्त्तते तत्र विधवेव हि केवलम् ॥१२७॥

तोपवृष्टिं सदा तत्र पाकिस्थानस्य सैनिकाः ।
कुर्वन्ति ध्वंसलीलायां प्रमत्ता मदविह्वलाः ॥१२८॥

नागरिकाश्च तां दृष्ट्वा हतप्राणा भवन्ति ते।
पलायन्ते भयत्रस्ता विकला भग्नमानसाः ॥१२९॥

सकलं विकलं पश्य पलायनपरायणाः ।
तत्रत्या भारतीयाश्च क्लेशकष्टपरायणाः ॥१३०॥

इतस्ततः प्रधावन्ति वासाय भोजनाय च ।
शरणं कुत्र वा नेयं सर्वत्र कष्टयातना ॥१३१॥

भवन्ति खण्डिताः नष्टाः दुष्टानां दुष्टपीडनैः ।
अनुभवन्ति कष्टानि न त्यजन्ति च शिष्टताम् ॥१३२॥

न जीवनाय वा चिन्ता परिवारस्य वा कदा ।
न मित्रज्ञातिबन्धूनां चिन्ताज्वरेण पीडिताः ॥१३३॥

एकध्याने यथाशक्ति युयुत्सवश्च सैनिकाः ।
न चिन्तयन्ति संसारं संग्रामरक्तरञ्जिताः ॥१३४॥

न खाद्यं मिलति योग्यं न चावश्यकपानीयम् ।
न निद्रा न च वा स्वप्नाः केवलं शत्रुसैनिकाः॥१३५॥

विहाय सकलं सौख्यमनाहारेण दुर्बलाः ।
विस्मृत्य मधुरं सर्वं संग्राममोदमानसाः ॥१३६॥

उपरि तपनस्तप्तस्तथाधस्तप्तबालुका ।
सम्मुखे मरणो देवश्चतुःपार्श्वे च सैनिकाः ॥१३७॥

पलायनाय न पन्थाः तेषां तत्रैव विद्यते ।
मरणं मारणं मात्रं सरणीयञ्च केवलम् ॥१३८॥

सम्मुखे माननीया नो जननी पुत्रवत्सला ।
असहाया स्थिरा देवी बलात्कारेण मर्दिता ॥१३९॥

करुणदुर्दशां तस्याः पश्यन्नेव च प्रस्तरः ।
क्रन्दिष्यति नूनं दुःखे पुत्राणां वद का कथा ॥१४०॥

विलोक्य वैभवं भव्यं नव्यं भारतगौरवम् ।
इर्ष्यापरायणाः सन्तः कुर्वन्ति युद्धधारणाम् ॥१४१॥

धनहानिर्महद्दुःखं जनहानिस्ततोऽधिकम् ।
कुफलं सर्वतो मात्रं युद्धेन किं प्रयोजनम् ॥१४२॥

दुर्बुद्धयो न पश्यन्ति हिताहितं शुभाशुभम् ।
प्रपातं नैव पश्यन्ति पश्यन्ति मधु केवलम् ॥१४३॥

तदर्थमिह नो मैत्री भावना बलवत्तरा ।
पारस्परिकबन्धुत्वं नैवास्ति देशयोर्द्वयोः ॥१४४॥

हितचिन्तास्ति नो यत्र नापि मङ्गलकामना ।
बन्धुभावः कथं जायेत् यत्र न सौख्यचिन्तनम् ॥१४५॥

येषाञ्च रक्तमांसेषु तादृशी हीनभावना ।
किं करिष्यन्ति ते मूर्खाः देशस्याक्रमणं विना ॥१४६॥

भारतीया वयं सर्वे शान्तिमैत्रीप्रचारकाः ।
अहिंसा परमो धर्म-नीतेश्च गायकाः वयम् ॥१४७॥

भारतीयाः वयं सर्वे शान्तिदूता निरन्तराः ।
अस्माकं हृदये नास्ति संकीर्णा स्वार्थचेतना ॥१४८॥

वयं न कुटिलाः क्रूराः प्रस्तरपांशुमानसाः ।
वयं न चाटुला चौराः परस्थानापहारिणः ॥१४९॥

तस्मादस्तु शुभं नित्यं भारते प्रियभारते ।
सर्वेऽत्र सुखिनः सन्तु भयं विनैव भूतले ॥१५०॥

सामान्या घटना नास्ति विस्मर्तव्या भविष्यति।
मानवस्येतिहासेऽयं कार्गिलः स्थास्यति चिरम् ॥१५१॥

वीराणां रक्तदानेन विमुक्ता या वसुन्धरा ।
तस्यां भूमौ सुरकीर्त्तिस्तिष्ठतु ह्यविनश्वरम् ॥१५२॥

पण्डारवीन्द्रकविना लिखितं काव्यकार्गिलम् ।
वीराणां सैनिकानाञ्च कीर्त्तयितुं सुगौरवम् ॥१५३॥

हसन्तु वा लसन्तु वा प्रहसन्तु विचक्षणाः ।
स्मरणेन कृतं काव्यं स्मरणाय हि केवलम् ॥१५४॥

×××

श्रीप्रकाशचन्द्रमिश्रप्रणीता

'प्रकाश-किरणावली'

(१)

अभक्तं विषयासक्तं पाहि मां रघुनन्दन।
पापहेतोः परित्त्यक्तुं दीनपालक नार्हसि ॥१॥

कामादिदोषैः परिपूरितोऽस्मि
स्वल्पापि भक्तिर्हृदि विद्यते नो ।
एतादृशोऽहं शरणं प्रपद्ये
त्रायस्व मां राघव दीनबन्धो ॥२॥

विषपानप्रवीणोऽसि तस्मात्त्वां प्रार्थये प्रभो ।
अस्मद्द्वेषविषं पीत्वा दद्याः प्रेमामृतं हि नः ॥३॥

हालाहलं त्वया पीतं विश्वरक्षणहेतवे ।
कृतज्ञैर्मनुजैस्तेन महादेवस्त्वमुच्यसे ॥४॥

विपन्नकृष्णापरितापचौरं
ग्राहागृहीतद्विपदु:खचौरं ।
दीनस्य मित्रस्य च दैन्यचौरं
चौराधिपं कृष्णमहं नमामि ॥५॥

रासोत्सवे मानिनिमानचौरं
कामस्य तत्रैव च दर्पचौरम् ।
स्निग्धार्जुनस्यापि विमोहचौरं
चौराधिपं कृष्णमहं नमामि ॥६॥

अहं करोमीत्यभिमानचौरं
दुर्वृत्तदु:शासनदर्पचौरम् ।
कंसस्य पापस्य च प्राणचौरं
चौराधिपं कृष्णमहं नमामि ॥७॥

अनन्यभावार्चकपापचौरं
स्वदासचित्तस्य त्रितापचौरम् ।
तद्ध्यायतः कृत्स्नतमिस्रचौरं
चौराधिपं कृष्णमहं नमामि ॥८॥

(२) जयेत्सा सुरभारती

नरं हि निर्मलस्वान्तं ततः कर्तुं नरोत्तमम् ।
सदैव यतते या हि जयेत्सा सुरभारती ॥१॥

स्वानि कर्माणि कुर्वन्तः संसिद्धिं यान्ति मानवाः ।
इत्युपदेशदात्री या जयेत्सा सुरभारती ॥२॥

आत्मवत्सर्वभूतेषु वर्ततामिति शासती ।
उन्मीलयति चक्षूंषि जयेत्सा सुरभारती ॥३॥

वसुधैव कुटुम्बं मे घोषं विद्वेषनाशकम् ।
या करोति जगन्माता जयेत्सा सुरभारती ॥४॥

हतो यो रिपुभिः षड्भिस्तस्य जीवातवे मुदा ।
ब्रह्मज्ञानसुधादात्री जयेत्सा सुरभारती ॥५॥

बाल्मीकिव्यासमन्वाद्यैः कालिदासादिभिस्तथा ।
वन्द्यमानपदाब्जा या जयेत्सा सुरभारती ॥६॥

अर्थदा या न सा विद्या सा विद्या या विमुक्तये ।
विवेकं या ददातीमं जयेत्सा सुरभारती ॥७॥

(३) कबन्धः

श्रुतं मये दं किल बाल्यकाले
इन्द्रारिरासीद्धि कबन्धनामा ।
मूर्ध्ना विहीनोऽपि न दृष्टिहीनो
नेत्रे विधात्रा जठरे कृते वै ॥१॥

श्रुतो न केनापि न दृष्टपूर्वो
न साम्प्रतं लभ्यत एव भूमौ ।

विचार्य ह्येतत्प्रकृतेर्विरुद्धं
मिथ्या भृशं सर्वमिदं हि मेने ॥२॥

पाशे विनष्टे परतन्त्रतायाः
दृष्टं परं विस्मयकारि दृश्यम् ।
भेका यथा प्रावृषि यत्र तत्र
तथा कबन्धा विचरन्ति मुक्ताः ॥३॥

दुर्भाग्यमेतत्खलु यत्कबन्धै-
र्बलाच्च धौर्त्याद् धृतमस्ति तन्त्रम् ।
चमत्कृतस्तद्विभवेन लोको
बाहुल्यमेषामत एव जातम् ॥४॥

रात्रौ तु वप्रान्गवयाश्चरन्ति
देशं कबन्धास्तु दिवा च रात्रौ ।
प्रतिक्षणं सीदंति तेन लोकः
शनैर्निमज्जन् गहनान्धकारे ॥५॥

कबन्धनाशोऽस्ति जगद्धिताय
जीवत्सु चैतेषु जगद्विनाशः ।
उच्छेदनार्थं हि समूलमेषां
कुर्याम यत्नं स्वबलानुरूपम् ॥६॥

प्रतिष्ठितो यो हृदये कबन्धो
निष्कासनीयः स विना विलम्बम् ।
इत्थं कृते बाह्यचरा कबन्धा
नंक्ष्यन्ति वेत्स्यन्ति जनाश्च मोदम् ॥७॥

प्रकाशचन्द्रमिश्रस्य कबन्धाख्यानकं शुभम् ।
सविवेकं पठेद्यस्तु धर्मान्नो स विचाल्यते ॥८॥

(४) कु

भेत्तुं नाशाकि कृष्णेन मोहो यस्तु किरीटिनः ।
क्षिप्रं सैष पितुर्मोहः कुपुत्रेण विनाश्यते ॥१॥

असाध्यरोगत्रस्तस्यं कष्टाद्विलपतो भृशम् ।
क्षणेनैव कुवैद्येन कष्टं सर्वं समाप्यते॥२॥

मोहजाले सुभार्या तु बध्नाति स्वपतिं प्रियम्।
छिनत्ति प्रसभं तत्तु कुभार्या हितकारिणी॥३॥

कुशब्दालङ्कृताः सर्वे जनस्य हितकारिणः ।
अस्वादुहितशब्दः कु रोचते मे यथौषधम्॥४॥

(५) माभिमानं कृथाः

कोऽपि मूर्खो न विज्ञो धनी वाऽधनी
जायते स्वेच्छयास्यां जगत्यां सखे ।
यद् भवत्यत्र तल्लीलयैव प्रभो !
माभिमानं कृथा माभिमानं कृथाः॥१॥

अग्निवर्णोऽपि जातो रघूणां कुले
येन तेषां यशः कृष्णतां प्रापितम् ।
कालचक्रं स्वयं मन्यते स प्रभुः
माभिमानं कृथा माभिमानं कृथाः ॥२॥

दर्पमूर्तिस्तु दुर्योधनो यो ह्यभूत्
कारिता येन नग्ना स्वयं द्रौपदी ।
तेन भीत्या जले गूहितं स्वं वपुः
माभिमानं कृथा माभिमानं कृथाः ॥३॥

भारते सङ्गरे लब्धकीर्तिस्तु यः
गोपिकारक्षणे नष्टवीर्यो हि सः।

क्रीडकः श्रीहरिः शारका मानवा
माभिमानं कृथा माभिमानं कृथाः ॥४॥

रामनिर्वासनं जानकीधर्षणम्
रावणस्याहवे प्राणनाशश्च हि ।
द्योतयन्तीति सर्वंकषः स प्रभुः
माभिमानं कृथा माभिमानं कृथाः ॥५॥

येन मध्याह्नकाले भृशं तप्यते
भानुनास्ताचलं गम्यते तेन हि ।
कोऽपि शक्तो न कालं समुल्लंघितुं
माभिमानं कृथा माभिमानं कृथाः ॥६॥

तारतम्येन सर्वे कृता जन्तवः
दृश्यते कौ न यस्मायलं नो प्रभुः ।
स्मार्यमेतत्सदा श्रेयसे मानवैः
माभिमानं कृथा माभिमानं कृथाः ॥७॥

(६) त्वं कुरुष्वोद्यमम्

बीजमुप्त्वैव कृत्वा च भूसेचनम्
शस्यमाशास्यते बुद्धिमद्भिर्नरैः ।
भूमिमुद्भिद्य बीजं स्वयं जायते
त्वं कुरुष्वोद्यमं त्वं कुरुष्वोद्यमम् ॥१॥

लब्धुकामा महार्हाणि रत्नानि ये
यान्ति नक्रादिभिः पूर्णमब्धेस्तलम् ।
अन्यथा कुर्वतां व्यर्थ एव श्रमः
त्वं कुरुष्वोद्यमं त्वं कुरुष्वोद्यमम् ॥२॥

उद्यमेनैव गान्धी महात्माऽभवत्
श्रीसुभाषोऽपि नेता प्रयासेन हि ।
लौहनेति प्रसिद्धो ह्यभूद् वल्लभः
त्वं कुरुष्वोद्यमं त्वं कुरुष्वोद्यमम् ॥३॥

उद्यमेनैव यत्प्राप्यते तत्स्थिरं
प्राप्यते यत्कृपातस्तु तच्चञ्चलम् ।
अत्र गाथा त्रिशङ्कोः प्रमाणं भवेत्
त्वं कुरुष्वोद्यमं त्वं कुरुष्वोद्यमम् ॥४॥

प्राप्यते यत्कृपातो विनैवार्हतां
तत्करोत्यात्मविश्वासनाशं ध्रुवम् ।
आत्मविश्वासनाशो विनाशाय हि
त्वं कुरुष्वोद्यमं त्वं कुरुष्वोद्यमम् ॥५॥

(७) सुभाषितानि

वस्तुनो भिन्नरूपाणि दृश्यन्ते भिन्नदर्शकैः ।
एकैव स्त्री सुता जाया स्वसा माता च भासते ॥१॥

रत्नादिभूषिता वेश्या गर्हणं भजते सदा ।
सकन्थापि सती नारी सम्मानस्यैव भाजनम्॥२॥

प्रज्वलन्ति मनोदीपा वासनातैलपूरिताः ।
निःशेषतैलदीपानां ज्वलनस्य तु का कथा ॥३॥

कोपायैवाधमर्णस्य यथर्णस्यानुबोधनम् ।
कथितो ह्युपकारोऽपि तथा वैरस्य कारणम् ॥४॥

नराय प्रभुणा दत्तं साक्षात्कल्पतरुर्मनः।
तत्प्रसादात्स प्राप्नोति यद् वाञ्छति शुभाशुभम् ॥५॥

अविनाशिकृते किञ्चिद् विष्टपे नास्ति नाशवत्।
अभावो नास्ति कस्यापि नश्यत्यपि पुनः पुनः॥६॥

गृहाश्रमप्रवेशाय गृहिणीसुखमामिषम् ।
विदग्धेन कृतं धात्रा येन मीनन्ति मानवाः ॥७॥

नरो भार्याप्रमाणो हि लभते सर्वसम्पदः ।
इति बुद्ध्वा त्रिनेत्रोऽपि भजते पार्वतीं मुदा ॥८॥

नराय श्लाघते स्वार्थी निःस्पृहस्तन्तु श्लाघते।
विज्ञातुमेतयोर्भेदं पाणिनीयेन शक्यते ॥९॥

सर्वेषां सुखदं नित्यमनुशासनंपालनम् ।
तत्प्रभावेण जायन्ते मुक्ताः सलिलबिन्दवः ॥१०॥

लिङ्गानुशासनं नूनं मुनीनामपि दुष्करम् ।
पुल्लिङ्गे तैः कृता दाराः कृतं लिङ्गं नपुंसके ॥११॥

स्वदुःखे प्रकटीकुर्वन् को न यात्युपहास्यताम् ।
वीक्ष्य खस्य हिमाश्रूणि हसन्ति कुसुमान्यपि ॥१२॥

ज्वलन्तीं वर्त्तिकां दृष्ट्वा स्नेहोऽपि ज्वलति स्वयम् ।
परंदुःखेषु कातर्यं प्रकृतिर्हि सतां सदा ॥१३॥

प्रकाशं भास्करो दत्ते दाहं सोढ्वाप्यमुक्षणम् ।
सर्वस्पृह्यं तु तत्तेजो दाहोऽनन्तो न स्मर्यते ॥१४॥

कलंशश्चषकं नत्वा प्रेम्णा चुम्बन् पुनः पुनः ।
हालया भरते तञ्च सज्जनानामियं गतिः ॥१५॥

प्रदर्शयति कालुष्यं मानसं चन्द्रमा दिवः ।
उच्चैःस्थिता न सर्वेऽपि जातु सन्ति विवेकिनः ॥१६॥

छद्मभिक्षाक आयातो यशो दातुं हि मे प्रभुः ।
भावेनानेन यद्दत्तं जातं तेनैव सार्थकम् ॥१७॥

कर्तारो मनुजान् श्रेष्ठान् ऋषिसंज्ञामुपागताः ।
कृतज्ञैर्मनुजैस्तेऽतस्तर्प्यन्ते पितृभिः सह ॥१८॥

सन्तोषो दत्रिमो ज्ञेयो लोभो नूनं तु लब्ध्रिमः ।
भृत्रिमा सर्वथा प्रीतिः हर्षशोकौ विहित्रिमौ ॥१९॥

यौवने गृहपालो यो गृहपालो जरस्यपि ।
अन्तरं तु तयोर्ज्ञातुं श्लेषज्ञानेन शक्यते ॥२०॥

याति यत्रैव तत्रैव भृशं दीपः प्रकाशते ।
न हि कस्यापि दीपस्य गृहं कुत्रापि विद्यते ॥२१॥

भक्तबन्धूश्च तेषां च दृष्ट्वा पोषकमीश्वरम् ।
चर्कशीति च विश्वासः श्रद्धा जेजीर्यते च मे ॥२२॥

ये हयान् गर्दभीयन्ति हयीयन्ति च गर्दभान् ।
तेषु प्राप्ताधिकारेषु किं न याति विपर्ययम् ॥२३॥

याचमानेन लभ्येते धनमन्यच्च वाञ्छितम्।
सुलभौ स्नेहमानौ नो याचतोऽपि गृह गृहम् ॥२४॥

तदैव स्वरयेत् प्राज्ञः विकल्पो न यदा भवेत्।
कुर्वाणः फूत्कृतिं सर्पः पीडयन्तं हि दङ्क्ष्यति ॥२५॥

अन्यद्भुतं विषं क्रोधो यत्पीत्वामृतमश्नुते।
तद् वमन् मनुजो याति प्रायशो घोरयातनाम्॥२६॥

एकवर्णा हि दीपार्चिर्विविधा काचवर्णतः।
चित्स्वरूपस्तथात्मापि मायासङ्गात् सुखासुखी ॥२७॥

यदेव क्रियते सद्भिः श्लाघ्यतामुपयाति तत्।
यत्कृष्णकृतसारथ्यं सर्वैरेव प्रशस्यते ॥२८॥

उद्यानं यस्य कस्यापि फलपुष्पसमन्वितम्।
मोदन्ते सज्जना वीक्ष्य पीड्यन्ते तेन दुर्जनाः ॥२९॥

साधनं साधनीयं हि श्रेयः प्रेयश्च काङ्क्षिभिः।
साधनेऽसंयते जाते भ्रंशः केन निवार्यते ॥३०॥

संसारस्तु द्विधा प्रोक्त आत्मकृत् परमात्कृत्।
आद्यसेवा तु मोहाय परसेवा विमुक्तये॥३१॥

सुभावो वा कुभावो वा स्वभावो दुस्त्यजो नृणाम्।
माधुर्यं मोदकेनेव तिक्तता निम्बकैर्यथा॥३२॥

यः करोति प्रियं किञ्चित् तस्य तस्मै स रोचते।
वर्त्तितव्यं विचार्यैतत्सर्वैः सह सदा नरैः ॥३३॥

वृद्धाः श्रेयश्चिकीर्षन्ति बालानां न तु तत्प्रियम्।
दुर्भाग्यमिति तेषां ते जायन्ते कोपभाजनम् ॥३४॥

संत्यजन्ति न साधुत्वं मृत्युभीत्यापि साधवः।
भुज्यमानं सदा लोकैर्माधुर्यं मोदकं यथा॥३५॥

जनाः शरीरयात्रार्थं धनीयन्त्विति साम्प्रतम्।
असुरन्ति नरास्ते ये धनायन्ति निरन्तरम् ॥३६॥

प्रासादीयति कुट्यां यः प्रासादे च कुटीयति ।
परिक्रामति मोक्षस्तं वीतरागं पदे पदे ॥३७॥

उपेक्ष्य जनथूत्कारं परेषां हितकारकम् ।
कटुत्वं न परित्यक्तं धन्या ते निम्ब धीरता ॥३८॥

द्राक्षे भाग्यवती यत्ते मिष्ट आरोग्यदो रसः ।
दैवानुग्रह एवैष न किञ्चिद् गर्वकारणम् ॥३९॥

प्रत्यग्नि प्रविशन्तीह शलभा अवशा यथा ।
तथैव प्रतिनाशं हि यान्ति पापहता नराः ॥४०॥

अन्तरेकं बहिर्भिन्नो दृश्यसे त्वं तरम्बुज ।
तवेदं बाह्यभिन्नत्वं वचनीयं न तत्त्वतः ॥४१॥

स्पष्टमुच्यतेऽस्माभिः गौरवेणेति कथ्यते ।
शन्कुमो यदि तच्छ्रोतुं वस्तव्येयं धरा भवेत् ॥४२॥

मौनमास्थाय या ब्रूते हृद्गतं स्वप्रियं सदा ।
शब्दहीना परा भाषा सा तु प्रेम्णैव पाठ्यते ॥४३॥

महतां सर्वथाऽसह्यं शरणागतलाघवम् ।
अङ्कमारोढुकामं कं स्वमिव कुरुतेऽर्णवः ॥४४॥

कुलं संस्कर्तुमिच्छद्भिः प्रणेया मत्तकाशिनीः ।
रूपलावण्यमूढास्तु शलभन्ति सुनिश्चितम् ॥४५॥

विवेकसंयुताशक्तिः पूर्णानन्दप्रदायिनी ।
प्रयत्नस्तत्र कर्तव्यः सर्वैः कल्याणकाङ्क्षिभिः ॥४६॥

उपवासो धनाढ्यानां दरिद्राणामभोजनम् ।
संयमो यो बलिष्ठानां क्लीबानां क्लैब्यमेव तत् ॥४७॥

महतां हृदयं नूनं बाललालनतत्परम् ।
अतो हि धरते मूर्ध्ना बालचन्द्रमसं शिवः ॥४८॥

संभाव्यतां समीक्ष्यैव मानं कुर्वन्ति पण्डिताः ।
बालचन्द्रमतो मूर्ध्ना त्रिनेत्रो धरते हरः ॥४९॥

ग्रीष्मे ददाति शैत्यं च शरदर्तौ कवोष्णताम्।
युवत्यङ्गं कृतं धात्रा गृहं वातानुकूलितम् ।।५०।।

दुःशीलो यः प्रकृत्यैव न स क्षम्यः कदाचन।
क्षान्तो द्रौणिस्तु निर्लज्जो भ्रूणं हन्तुं प्रचक्रमे।।५१।।

पीत्वापि कालकूटं यो जग्ध्वा मातुलपुत्रकान्।
कदापि नैति विक्षोभं महादेवः स निश्चितम्।।५२।।

आन्तर्यं महतां लब्धुं स्थानाभेदेन शक्यते।
तेषामान्तरतम्यं तु साध्यते हि प्रयत्नतः।।५३।।

स्थानेऽन्तरतमः कार्य आदेशोऽयं स्वयं मुनेः।
कलौ हन्तेति कुर्वाणा वाच्या सन्ति पदे पदे।।५४।।

समृद्धानानुवर्तेरन् कदाप्याढ्यचरा जनाः।
महानदाः क्व चोद्वेला निदाघार्ताः क्व निम्नगाः।।५५।।

शत्रुत्वे वर्त्तितव्यं हि तथास्माभिर्यथा वयम्।
नो व्रीडामुपगच्छाम मित्रत्वे पुनरागते।।५६।।

सद्यः प्रस्फुटितं पुष्पं रूपगन्धसमन्वितम्।
रचितं जनमोदाय यो नाकृष्टः स किन्नरः।।५७।।

आत्मावलोकनार्थाय प्राप्तो हृद्दर्पणो नरैः।
तत्रात्मानमपश्यन्तो व्यर्थीकुर्वन्ति तन्तु ते।।५८।।

कृत्वा निर्वचने ब्रूते यथाकालं तु यो नरः।
अखिलं जगतः श्रेयः स्वयं तमनुगच्छति।।५९।।

रत्नाकरस्य विक्षोभस्तथा दाहो रवेरपि।
प्रमाणीकुरुतः सर्वं जगत्यां दुःखभाजनम्।।६०।।

हाहाकारं समुद्रस्य निशम्यैषा मतिर्मम।
निवारणाय दुःखानां व्यर्थं सर्वं धनं भुवः।।६१।।

संहन्तुं दानवान् येन काले कालेऽवतीर्यते।
तद् भक्तानां परं युक्तमत्याचारिविमर्दनम्।।६२।।

आजीवं दोग्धि पित्रादीन् दुहितेति सुसाम्प्रतम् ।
व्युत्पन्ना सा हि दुग्धातोः प्रकृतिर्दुरतिक्रमा ॥६३॥

युवती यौति भर्तारं पितृभ्यां तञ्च यौति सा ।
मिश्रणामिश्रणे यौति सार्थमुक्तं महर्षिणा ॥६४॥

विचित्रो खलु संसारः सर्वं हरतु शक्तिमान् ।
दीयते निर्बलेभ्योऽस्मिन्नर्धचन्द्रस्तु केवलम् ॥६५॥

रिक्तीभूयैव जीमूतैर्धरित्री हरितीकृता ।
पन्था नास्तीह कोऽप्यन्यः जनसेवाचिकीर्षताम् ॥६६॥

दापयति मया देवः कर्तुं मां कीर्तिभाजनम् ।
इति संकल्प्य यद्दत्तं दत्तं तद्धि यथार्थतः ॥६७॥

काले कृतं यथा कर्म तन्नाकाले कृतं तथा ।
कालेऽकाले जलं स्त्री च मुक्ता भूत्वापि नैकधा ॥६८॥

केन सह यदायाति तदापदमशोभनम् ।
राजते तद् वियुक्तं तु पदं ज्ञानं यशोधनम् ॥६९॥

एक एव हि नाऽयाति गच्छत्यप्येक एव च ।
नातिस्नेहं नरः कुर्यात् कस्मिन्नपि प्रिये जने ॥७०॥

अङ्गान्यप्यस्मदीयानि नानुवर्तीनि वार्धके ।
अशोच्यं सर्वथैवेदं यद्यन्ये सन्तु तादृशाः ॥७१॥

यथा प्रावृषि भेका हि खलगृह्यास्तथा कलौ ।
सद् गृह्या विरला जाता प्रभात इव तारकाः ॥७२॥

प्रतिवातं घनो याति न कदापीति कथ्यते ।
स जडः किं प्रमाणं स्याच्चेतनानां मनीषिणाम् ॥७३॥

घनस्तु निजजाड्यत्वात्प्रतिवातं न गच्छति ।
यथायोग्यं तु गन्तव्यं प्रतिवातं मनीषिभिः ॥७४॥

भुजङ्गांश्च पिशाचांश्च सेवमानान्निरंतरम् ।
सावधानतया शास्ति मस्ततः शङ्करोऽस्ति सः ॥७५॥

अतिदृप्तजनस्येदमज्ञातनमनं शिरः।
त्वद्गुणैर्भ्रमरीभूय भजते पादपुष्करे ॥७६॥

क्लिश्यते नो जगद्रक्षन् पुरुषोऽपि पुरातनः।
मन्ये सञ्जीवनीयन्ते जयघोषा हि तत्कृते ॥७७॥

समानं शिष्यते राज्ञा वृद्धो वा तरुणोऽस्तु वा।
वृद्धः स्यात्किं विनिर्मुक्त उच्यतां मारशासनात्॥७८॥

धात्रा यत्कल्पितं नृभ्यस्तानायाति तथैव तत् ।
सायंकाले यथायाति नीडस्थान् शावकान् खगः ॥७९॥

यत्करोति दयासिन्धुस्तस्यानुग्रह एव तत् ।
हन्यन्ते राक्षसास्तेन तेषां शापविमुक्तये ॥८०॥

दीनार्तिं न हि शृण्वन्ति लोकाः प्राप्य धनप्रति।
तच्छृणोति जगन्नाथो झटित्येवेति विस्मयः॥८१॥

चिन्त्यतेस्म पुरा लोकैः कथं लोकः सुखी भवेत् ।
अधुनातनचिन्तेयं कथं लोको विनश्यतु ॥८२॥

अजितात्मजितात्मानामन्तरं कथितं बुधैः ।
अनयोरुभयोरेव काननं काननं ध्रुवम् ॥८३॥

गजास्ये पुण्ड्रदानं खेलनं नो मन्यताम् भगवन् ।
यदेच्छसि त्वं तमादातुं तदा ज्ञास्यसि स्वबुद्धिं त्वम् ॥८४॥

मसीहसुकराताभ्यां श्रीमिश्रो ह्यतिरिच्यते ।
उपदेशपटु तौ तु पापभाषणयोर यम् ॥८५॥

अतिकर्णा जनाः सर्वे यदि ते नास्ति कामना ।
सकामश्चेद् भवांस्तर्हि सर्व एव हि भिक्षुकाः ॥८६॥

प्रातः प्रातर्यथा कालं निद्राभङ्गं करोति या ।
घण्टिकां तां विनिन्दन्ति जागरित्वा स्वपन्ति ये ॥८७॥

यथादेशं न सेवन्ते ये पथ्यन्तु च भेषजम् ।
गर्हन्ते गदहं ते हि किमाश्चर्यमतः परम् ॥८८॥

गुणवत्सु वरं याच्ञा मोघापीति महाकविः ।
आदातुः सान्त्वनायैव न तु दातुः कदाचन ॥८९॥

किमत्र चित्रं यदि स्वप्रजानां
दृष्ट्वा समृद्धिं मुदमेति मर्त्यः ।
स्वसिक्तवृक्षान् फलितान् विलोक्य
मोदानुभूतिः प्रकृतिर्नराणाम् ॥९०॥

पुरा पुत्रे वयप्राप्ते चतुर्बाहुः पिताऽभवन् ।
विपरीतं कलावेतच्चतुष्पादः स जायते ॥९१॥

शब्दायेत विपद् दृष्ट्वा गृहपालादवेक्ष्यते ।
वर्त्तेरन् मूकवद् वृद्धा इत्यपेक्षा भयङ्करी ॥९२॥

नर इच्छेद्यथावित्तं जीवने सुखसाधनम् ।
जीवन्नेवं विधं लोके परां शान्तिं स प्राप्स्यति ॥९३॥

अनासक्तोऽपि सर्वेषु धावित्वा सत्करोत्यसौ ।
मदमोहविनिर्मुक्तो भ्रमरो मे प्रतीयते ॥९४॥

पुष्पं पुष्पं प्रधाव्यापि भ्रमरो रसलोलुपः ।
न हि तुष्टिमवाप्नोति कामुकानामियं गतिः ॥९५॥

अशरण्यशरण्यौ यौ साक्षात्प्रेम प्रभोः पुनः ।
काञ्चनौ तौ स्तनौ वीक्ष्य यो मुह्यति स मूढधीः ॥९६॥

दुर्व्यवह्रयमाणो हि दासस्त्यजति स्वामिनम् ।
त्यज्येरन्न कथं राभिरादरन्ति न ये धनम् ॥९७॥

सर्वमन्यद् वृथा तस्य लब्धा येन मनुष्यता ।
तस्याप्यन्यद् वृथा सर्वं प्राप्ता नूनं न येन सा ॥९८॥

गृह्यते न मनः कस्य प्रदिना चित्तहारिणा ।
स्थाने पतिः नरीनर्ति नवोढां परितः पतिः ॥९९॥

प्रभुत्वं धनमैश्वर्यं सम्मानं च प्रयच्छसि ।
तस्मादाजीवमासन्दि लोकस्त्वयि सिसंक्षति ॥१००॥

रूपह्रासात्तु स्नेहेन क्षीयते न मनागपि ।
पूर्णेन्दुरिव क्षीणेन्दुः धार्यते नभसा हृदि ॥१०१॥
आग्नेयगिरिरप्यस्ति न च तादृग्घलाहलम् ।
विश्वस्मिन् घातको यादृग् अत्यनुशासनो विदन् ॥१०२॥
ये जना विवशीभूताः कीटवज्जीवितुं भुवि ।
आक्रोशस्तु कथं तेषामत्याक्रोशं भवेन्नृणाम् ॥१०३॥
दर्पणं ना स्वयं पश्येन्नान्यं दर्शयेद्धि सः ।
दृष्टे तस्मिन् परा शान्तिः दर्शिते तु महाक्षतिः ॥१०४॥
तेनाधीतेन किं येन रावणत्वं न नाश्यते ।
अनधीतं वरं यस्मिन् सत्यपि निर्मलं मनः ॥१०५॥
सम्मानो दुष्कृतां यत्र सुकृतां चावहेलनम् ।
दुर्जनं तस्य देशस्य प्रभुणापि न वार्यते ॥१०६॥
जग्ध्वा जग्ध्वा पुनर्जग्ध्वा यस्तथापि जिघत्सति ।
जीवोऽतिकुम्भकर्णः सः ख्यातोऽस्त्यसुरसंज्ञया ॥१०७॥
सामान्यजनदोषा ये शक्तिमत्सु हि ते गुणाः ।
पक्षपातो नृणां यस्तु सैवेशस्य दयालुता ॥१०८॥
हत्या च प्राणदण्डश्च शापमोक्षस्तथैव च ।
कर्तृभेदेन नामानि जातान्येकस्य कर्मणः ॥१०९॥
संसारमार्गप्रवकः प्रवीणः
आपन्नस्वेष्टो भवतीति सत्यम् ।
बम्भ्रम्यते यः पथि दुस्तरेऽस्मिन्
लोकद्वयं तस्य विनष्टमेव ॥११०॥
सर्वथा गुणहीनोऽपि वशं हि कुरुते जनम् ।
कृतज्ञताप्रकाशेन क्रोडमारुह्यते शुना ॥१११॥
जगन्नाथो वशं याति मनुष्याणां तु का कथा ।
प्रीणाति गुणहीने ऽपि स्तूयमानो हरिः स्वयम् ॥११२॥
हृद्गतं वक्तुमर्हन्ति सर्व एव तथापि तु ।
कं कथं किं कदा ब्रूयादिति निश्चित्य भाष्यताम् ॥११३॥

यस्य कस्यापि मृद्वीकाश्चरन्तं वीक्ष्य रासभम्।
क्षोभते मानवो नूनमनाचाराक्षमो जनः ॥११४॥

आपदां चण्डवातेऽपि निष्कम्पो गिरिवत्तु यः।
तस्मै ददाति तन्मृत्युरमरत्वमसंशयम् ॥११५॥

सर्वथाऽपरिहार्यत्वान्नाक्षम्य वृजिनं जनैः।
इत्यास्ये वृजिनस्यापि शोभते न कदाचन ॥११६॥

ईशर्षिमुनयो लोके यान्त्वायान्तु यथासुखम्।
सर्वानादिग्रमाणोऽपि लोकस्त्वपरिवर्त्तितः ॥११७॥

परिवर्त्तयितुं नूनमन्यान्नो सुकरं भुवि।
यतामहै वयं तस्मात्स्वयं हि परिवर्तितुम् ॥११८॥

एकभर्ता जगद्भर्ता निमित्तं केवलं नरः।
दादेति यस्तु मत्त्वेति दातॄणामुत्तमो हि सः ॥११९॥

सल्लक्ष्यप्राप्तये यत्तु नरैः कष्टं विषह्यते।
तदेव लब्धसम्मानं ऋषिभिस्तप उच्यते ॥१२०॥

यदेव लभ्यते लोके तत्सर्वं तपसः फलम्।
अत एका गतिर्नृणां तपो नात्र विचारणा ॥१२१॥

यथा हि कुर्वतोऽपथ्यं सञ्जीवन्यपि निष्फला।
नामजापस्तथैवास्ति सदैव विषयैषिणाम् ॥१२२॥

ऊषरोप्तं यथा बीजं प्रवाहे मूत्रितं यथा।
पापाचारनिमग्नानां तथैव हरिकीर्तनम् ॥१२३॥

जलेन भस्मतां यातमालातं दग्धुमक्षमम्।
हृतवीर्यं हरेर्नाम तथा पापकृतां नृणाम् ॥१२४॥

सपथ्यमौषधं नृणां यथा नित्यं सुधायते।
पुण्यार्थं यतमानानां तथैव हरिकीर्तनम् ॥१२५॥

क्षणमेकं न शक्नोति स्वयं दीपः प्रकाशितुम्।
प्रकाशते जनस्नेहैस्तत्र किं गर्वकारणम् ॥१२६॥

पितृप्रसादतः कायः ज्ञानं गुरुकृपाफलम् ।
बलमप्यन्नतः प्राप्तं नो नः किमपि स्वार्जितम् ॥१२७॥

अन्येभ्यः प्राप्यते यत्तु सर्वं भैक्षमुच्यते ।
हेतुना केन गर्वन्ति कुञ्चितश्मश्रवो वृथा ॥१२८॥

यथा विविध यन्त्राणि चाल्यन्ते विद्युतैकया ।
तथैव सर्वलोकोऽयं चाल्यते परमात्मना ॥१२९॥

निर्ज्योतिर्जायते दीपो यस्या अञ्चलवायुना ।
साक्षात्तस्याः परिष्वङ्गादनर्थः को न जायते ॥१३०॥

पाणिगृहीती शुभदा
पाणिगृहीता सदैव विपरीता ।
मात्राप्रति नोपेक्ष्यं
केनापि कल्याणकांक्षिणा ॥१३१॥

दत्त्वा स्वपादुके भ्रात्रे गुह्यं ज्ञानं ददौ प्रभुः ।
नूनूनं पादुका शास्ति निमित्तं केवलं नरः ॥१३२॥

सरित्समुद्रमेघज्याः कं ददन्ते परस्परम् ।
निःस्वार्थं दानमादानं यज्ञसंज्ञं कृतं बुधैः ॥१३३॥

मा भूत्सर्वेषु कार्येषु निकषस्तूपयोगिता ।
शान्तं पापं न हृष्याम वृद्धां निष्कास्य मातरम् ॥१३४॥

वृथा दानं समृद्धेभ्यो दृश्यतां स्वविवेकतः ।
सागरं प्रापितं यत्तु नूनं क्षारायते जलम् ॥१३५॥

महन्मूर्धानमास्थाय दोषवानपि श्लाघ्यते ।
शशाङ्कः शिवशीर्षस्थो याति कस्य न वन्द्यताम् ॥१३६॥

भूम्यासीनेषु वृद्धेषु युवानं वीक्ष्य विष्टरे ।
वदन्ति विस्मिताः कीशा वयं वायं तु वानरः ॥१३७॥

हृदये निष्कषाये तु काषायैः किं प्रयोजनम् ।
हृदयेऽनिष्कषाये तु काषायैः किं प्रयोजनम् ॥१३८॥

मन्युमारितमारं मः भ्रूभङ्गोत्थापितं स्त्रिया।
वीक्ष्य ह्रीणः पपौ क्ष्वेडं दृप्ता स्त्री ददते सुधाम् ॥१३९॥

असत्यं तु तदाऽसत्यं यदेदं भाष्यते जनैः ।
अधुनातननेतॄणां लक्ष्यभेद्यायुधं हि तत् ॥१४०॥

विलुप्ता प्रकृतिर्यत्र शिष्ट एको हि प्रत्ययः ।
तत्पदं यो विजानाति वस्तुतः पण्डितस्तु सः ॥१४१॥

देशस्य कर्णधाराश्चेदभविष्यन् सदाशयाः ।
अभविष्यन् जनास्तर्हि गतचिन्तास्तु सर्वथा ॥१४२॥

नंनम्येहं जगन्नाथं श्रीनाथं परमेश्वरम् ।
आपन्नयत्प्रसादास्तु क्षुध्यन्तीह न मानवाः ॥१४३॥

❖

कवोष्णम्

—डा० इच्छाराम द्विवेदी 'प्रणवः'

आतपमिदं कवोष्णं स्पृशति तनुं मे तथानुरागेण ।
हस्तो यथा त्वदीयो वक्षसि मे स्पन्दते रात्रौ ॥१॥

शिशिरातपे कवोष्णे कावश्यकता ममोर्णवस्त्राणाम् ।
श्यामागात्रनिभं यल्लग्नं मे देहभागेषु ॥२॥

शीते भवति यदुष्णा शीता चोष्णे तु यन्मयाधीतम् ।
तत्सत्यं तनुगात्रि त्वत्सङ्गादेव जानेऽहम् ॥३॥

मधुरसभाविनि वामे माधुर्यं वसति तवाधरे नूनम् ।
इक्षुदण्ड एषोऽत्र ह्यसूयया यज्जडीभूतः ॥४॥

विद्युच्छकटिकयाने नीता यामा मया तवोत्सङ्गे ।
सा यामा खलु यामा वामा अन्याः समा यामाः ॥५॥

एजति तत् तन्नैजति तद् दूरे तत्समीपके नित्यम् ।
ज्ञात्वा तवानुरागं श्रुतिवाक्यैः सत्यं समर्थितम् ॥६॥

इक्षुमती

—डा० इच्छाराम द्विवेदी 'प्रणवः'

इक्षुमति त्वं हृदये, सरला तथापि गमने कुटिलासि ।
मम कौटिल्यं मात-रपनय ते धारया साकम् ॥१॥

इक्षुमति त्वं नूनं तरला करुणासि चित्तजा भूमेः ।
कारुण्यं मम हृदये विस्तारय हे सदानीरे ॥२॥

मध्ये पाञ्चालानां गङ्गायमुनयोः सुन्दरे क्षेत्रे ।
तव धारा तनुगात्रि ! नव्यैव सरस्वती जाता ॥३॥

विरसं सुरसं कुरुषे क्षेत्रं नीरं तु पाययित्वा त्वम् ।
को वा मातुस्तन्यं पीत्वा हृष्टो न ज्ञायेत ॥४॥

हे मातः कृशगात्रि ! दत्त्वा स्तन्यं स्वपुत्रसन्ततये ।
कृशता ते संजाता कविवर्य्यैः सर्वदा वन्द्या ॥५॥

तव नीराशी धन्यो जडभरताख्यस्तु भारतो हंसः ।
नीरक्षीरविवेकः संदिष्टो येन तव तीरे ॥६॥

सौवीरो हि नरेशो रहूगणोऽसौ सुसंगतिं यत्र ।
लब्ध्वा मुदमापन्नो विजहौ ज्ञानेन भ्रूवशोकम् ॥७॥

भक्ति ज्ञान विरागास्तव तीरे निरतास्तपःसु हे मातः ।
तेषामिह सान्निध्यं तव कृपया जीवने मेऽस्तु ॥८॥

हे करुणामयि नदिके ! पदकमलं यासि शीतलामातुः ।
प्रापय मे भावाश्रु तत्पार्श्वं वारिणा साकम् ॥९॥

इक्षुरसं मधुमधुरं यत्ते स्तन्येन जायते क्षेत्रे ।
माधुर्यं मे हृदये तव पयसा स्यात्कदा मातः ! ॥१०॥

अपनय मातरविनयं, प्रशमय पापं शमय च परितापम् ।
कल्पय निजपदकमलं मातस्ते वन्दनं नित्यम् ॥११॥

त्वम्

—डा० इच्छाराम द्विवेदी 'प्रणवः'

चन्द्रातपधवले किं ? चन्दनकर्पूरनिर्मितासि त्वम् ।
यद्बालं शीतलयसि हृदये दाहं भृशं कुरुषे ॥१॥

नवमालिकासनाथे वासन्ते समये सति रतिनाथे ।
प्रियलतिके परभृतिके सहकारे मेऽपि कूज त्वम् ॥२॥

अयि रक्ताधरललिते सखि! तेऽधररञ्जनी हि धन्यास्ति।
लब्ध्वा यदधररागं सेयं रक्ताधरा जाता ॥३॥

भाग्याधिकास्ति नूनं मत्तस्ते गीतिपुस्तिका बाले ।
यत्सा हस्तगता ते विहरति तव वक्षसि प्रेम्णा ॥४॥

तव नयनद्वयलग्नं कज्जलमसितं दधाति सौभाग्यम् ।
सितास्तु वयमतिदीनास्त्वदद्दृष्ट्यां संस्थिता नैव ॥५॥

विधिकृपयैव भवेयं लघुधनपिटकं कदापि कालेऽहम् ।
सा मां वीक्ष्य तदैव जोगुप्यात् कञ्चुकीकोणे ॥६॥

रसभरितं संस्तवनं प्रतिदिवसं श्रुत्वापि निष्ठुरे हा ।
प्रणयभरं स्वं प्रणवं कथं न धत्से त्वमाश्लेषे ॥७॥

तव वीक्षितेऽस्ति मदिरा विधुमुखि कादम्बरी परिष्वङ्गे।
चित्रेयं मादकता, स्मृत्वैवाहं समुन्मतः ॥८॥

अयि गुणगणमदिराक्षि, दृष्ट्या ते मूर्च्छनां वयं नीताः ।
किं चषकामृतदानैः स्वं प्रणवं नैव जीवयसि ॥९॥

प्रेयसि लघुनि शरीरे कुसुमसमे ते कियद्बलं जातम् ।
महदाश्चर्यं धत्से हृदि विपुलमनुरागसागरम् ॥१०॥

चित्रैवास्ति चतुरता प्रहरसि दृष्ट्या सुखेन दूरस्था ।
मदनपुरीवास्तव्यः प्रणवोऽयं यद्व्रणी जातः ॥११॥

कामयेऽहम्

–डॉ० जनार्दनप्रसाद पाण्डेय 'मणिः'
संस्कृतविभागाध्यक्षः
राजकीय महाविद्यालयः, लेंसडाउन (जयहरिखाल),
पौड़ी-गढ़वाल (उ०प्र०)

प्रभाभासिते राजिते विश्वनीडे कलालालितं जीवितं कामयेऽहम् ।
सुधासम्भृते झङ्कृते लोकरागे रसाप्लावितं जृम्भितं कामयेऽहम् ॥१॥

न विद्वेषरीतिर्न कूटार्थनीतिर्न वा काचिदीर्ष्या यदीये प्ररोहे ।
पवित्राभिषेकैर्जगत्पावयत्तन्मधुक्षालितं मन्त्रितं कामयेऽहम् ॥२॥

प्रियैश्चाटुकारैर्वृतं यद्वितानं न कुर्वन्ति ये सङ्ग्रहं योग्यतानाम् ।
तदात्मानलैरस्तविध्वस्तपीठे समत्वाऽऽश्रितं चिन्तितं कामयेऽहम् ॥३॥

मनोऽन्यद्वचोऽन्यत्तथा कर्म चान्यत् सदा स्वार्थसिद्धिर्हि यल्लक्ष्यमेकम् ।
तदीयाऽनने वक्षसि स्थैर्यमाप्त्वा स्फुरत्साधनाऽभीप्सितं कामयेऽहम् ॥४॥

विनाशव्रतैर्दुर्बलैः क्षुद्रवादैर्जिता या वकैः साम्प्रतं लोकलीला ।
मरालस्वरैस्तां समाकृष्य बन्धो समेषां हितं सद्धितं कामयेऽहम् ॥५॥

करेषु स्थितो राष्ट्रसूर्यो हि येषां मठाधीशरूपादृता ये पृथिव्याम् ।
तदीयोच्छलत्पक्ष्मविच्छित्तियागे गुणापेक्षितं कल्पितं कामयेऽहम् ॥६॥

अकाशवाण्या १४.१.२००० ई० तारिकायां सायं ६.३० वादन काले 'तिळक स्मारक मन्दिर, पुणे' इत्यत्र समायोजिते २५.१.२००० तारिकायां रात्रौ १०.०० वादनतः ११.३० यावदाकाशवाण्याः समस्तकेन्द्रेभ्यः प्रसारणीये च गणतन्त्रदिवस-(२०००) सर्वभाषा-कविसम्मेलने पठिता संस्कृतकविता

जय–जय भारतदेश !

अरुण-किरण-रोचिष्णु-रेणु-कण-कण-मणिगण-रम्य सुवेश
जय जय भारत देश !

कलित-कुशेशय-कोश-कुसुम-रस-लोलुप-ललित मिलिन्दे
रविकर-निकर-समागम-विकसित-सुरभित-शरदरविन्दे
दिवसः विकिरति मङ्गल-कुङ्कुममतिशय-सुषमाशेष !
जय जय भारत देश !

शीतल-मन्द-सुगन्धित-समरस-मधुमय-मलय-समीरे
प्रकृतिः कलकल्लोल-पुलकिता स्नाति तटिन्यास्तीरे
बाह्याभ्यन्तर-पूत पुरातन-दिविषद्-दिव्य-निवेश !
जय जय भारत देश !

हिम-किरीट-कैलाश-सुशोभित पारावार-परेश !
वसुधा-सुधा-समन्वित ! षड्ऋतु-राजित-रुक्म-रमेश
त्वं ददासि शश्वत्सन्देशं जगते द्युम्न दिनेश
जय जय भारत देश !

प्रवहति यत्र पुरातनकालात् मानवतायाः गङ्गा
प्रीति-रीति-संस्कृति-कृति-कलिता सुनृतसभ्यतासङ्गा
प्रथमोषसः प्रथमसंद्रष्टः ! हे प्रज्ञा-प्रथमेश !
जय जय भारत देश !

नन्दन - विकसित - कलित - कल्पतरु - नवकुसुमान्यानीय
दिविषद्वृन्द-समर्चित पदतल ! हरि-हर-विधि-वरणीय
विश्व सभ्यता - शिक्षक दीक्षक ! जय गुरुवर्य गणेश
जय जय भारत देश !

रचयिता–डा० परम हंस मिश्रः
ए. ३६ बादशाहबाग, वाराणसी २२१००२ फोन ३५७०३८

जय–जय भारतदेश !

हिन्दी रूपान्तर

अरुण–किरण से कण कण मणिमय, तेरा मनहर वेश
जय जय भारत देश हमारे, प्यारे भारत देश !
रवि किरणों से विकसित सुरभित ये शारद अरविन्द
मंजु गूँजते जिन पर ये मधुमंगलव्रती मिलिन्द
दिवस लुटाते कुंकुम इन पर, सुषमा धरे अशेष !
जय जय भारत देश हमारे, प्यारे भारत देश !
शीतल सुरभित मलयानिल जब बहता धीरे धीरे
प्रकृति नहाती तब लहरों से पुलकित नदिया तीरे
हे तन–मन–पावन ! तुझमें चाहें सुर नवल निवेश
जय जय भारत देश हमारे, प्यारे भारत देश !
सिर पर हिम किरीट मनभावन, जलनिधि चरन पखारें
वसुधा सुधा समन्वित तेरी, षड् ऋतु शोभा धारें
तू वो रवि जो जग को देता ज्योतिर्मय सन्देश
जय जय भारत देश हमारे, प्यारे भारत देश !
मानवता की गंगा जाने कब से बहती तुझमें
प्रमुदित संस्कृति और सभ्यता प्रीति रीति की तुझमें
प्रथम उषा के पहले द्रष्टा हे प्रज्ञा–प्रथमेश !
जय जय भारत देश हमारे, प्यारे भारत देश !
नन्दन वन से कल्प पादप के सुमनों को लाकर
सुर गण पूजें तेरे पदतल, हुलसें ब्रह्मा हरि हर
विश्व सभ्यता शिक्षक दीक्षक ! तू गुरुवर्य गणेश
जय जय भारत देश हमारे, प्यारे भारत देश !

हिन्दी रूपान्तरकार :
डा० रमाकान्त शुक्ल
'रमालय' आर ६ वाणी विहार
नयी दिल्ली–११० ०५९
फोन : ५६२९९४६

देववाणी-परिषद्वार्ता

द्वादशतमः पण्डितराज-महोत्सवः

देववाणी-परिषदस्तत्त्वावधाने द्वादशतमः 'पण्डितराज-महोत्सवः' २४.१०.१९९९ ई० तारिकायां 'रमालयः, आर ६ वाणी विहार, नयी दिल्ली-११००५९' इत्यत्र सत्रत्रये सम्मानितोऽभूत्।

प्रथमे समुद्घाटन-सत्रे आदौ श्रीमोतीनाथसंस्कृतच्छात्रैर्वेदपाठेन मङ्गलाचरणं कृतम्। तदनु कु० ऋतु शर्मा निधि शर्मा च शास्त्रीयसङ्गीतपद्धत्या वाणी-वन्दनामकुरुताम्। महासचिवेन डा० रमाकान्तशुक्लेन स्वागतभाषणं कृतम्। प्रमुखवक्त्रा डा० बिशनलाल गौड 'व्योमशेखरेण' पण्डितराजजगन्नाथस्य काव्यस्य काव्यशास्त्रस्य च विस्तरशः परिचयोऽदायि। अस्य सत्रस्य मुख्यातिथिना श्रीदिनेशचन्द चतुर्वेदिना संस्कृतस्य कवीनां जयन्तीनामायोजनस्य आवश्यकता रेखाङ्किता। आध्यक्ष्यं परिषदुपाध्यक्षा श्रीमती रमा शुक्ला व्यधात्।

द्वितीये सत्रे 'पण्डितराज-जगन्नाथ-श्लोकपाठ-प्रतियोगिता' आयोज्यत यत्र छात्रैः 'गङ्गालहरीतः' श्लोकाः प्रस्तुताः पुरस्काराश्च प्राप्ताः। अस्य सत्रस्याध्यक्ष्यं डा० रामसुरेशपाण्डेयमहाभागेन कृतम्।

तृतीये सत्रे 'बहुभाषा-काव्यपाठ-गोष्ठी' समायोज्यत यस्या आध्यक्ष्यं प्रसिद्धहिन्दीकविः कथाकारश्च डा० रामदशमिश्रो निरवहत्। डा० मिश्रेण, डा० सुलेखचन्द्र शर्मणा, श्रीमती सरोजव्यास-महाभागया च हिन्दी-कविताः पठिताः, डा० सादिक महाभागेन उर्दूकविताः पठिताः, डा० बिशनलाल गौड 'व्योमशेखर'-रमाकान्तशुक्लाभ्यां संस्कृत-कविताः पठिताः। सर्वेभ्योऽतिथिभ्यः परिषत्प्रकाशिता ग्रन्था उपायनीकृता अभूवन्। अर्वाचीनसंस्कृतस्याक्षरयोजकस्य पं० चन्द्रभान शर्मणो माल्यार्पणेनाभिनन्दनमक्रियत।

प्रो० वें० कुटुम्बशास्त्रिमहाभागेन अर्वाचीनसंस्कृतस्य एकविंशवर्षपूर्त्यङ्को लोकायार्पितः

१२.१२.१९९९ तारिकायां राष्ट्रिय संस्कृत संस्थाननिदेशकेन प्रो० वें० कुटुम्बशास्त्रिमहाभागेन अर्वाचीनसंस्कृतस्य एकविंशवर्षपूर्त्यङ्कस्यौपचारिकं लोकार्पणं कृतम्। तेनोक्तम्– 'काचित् पत्रिका अनुस्यूततया प्रवर्तते इत्येष एव भवति महान् विशेषः। संस्कृतविषयिणी काचित् पत्रिका अनुस्यूततया प्रवर्तते इत्यन्यो विशेषः। 'अर्वाचीनसंस्कृतम्' एकविंशतिवर्षेभ्योऽनुस्यूततया प्रकाश्यमाणं द्वाविंशतितमे वर्षे पदं निदधातीत्येतद् वस्तुतः समेषामस्माकं गर्वस्य विषयः।' अस्मिन्नवसरे प्रो० कुटुम्बशास्त्रिणा 'मातः संस्कृतवाणि!' संस्कृतरचनापि मधुरस्वरेण पठिता।

'अर्वाचीनसंस्कृत'-प्रदर्शनी

अर्वाचीनसंस्कृतस्य एकविंशवर्षपूर्तौ 'दिल्ली संस्कृत अकादमी'-संगोष्ठी-कक्षे देववाणी-परिषदा १२.१२.१९९९ तारिकायाम् 'अर्वाचीनसंस्कृत-प्रदर्शनी' आयोजिता–सर्वश्री आचार्यवीरेन्द्रकुमारझा-मनीषकुमार झा, सन्तोष-चौधरी, नन्दकिशोर-आशीष-भवेन्द्र झा-आनन्दकुमारझा-कृतवैदिकमङ्गलाचरेण प्रारब्धायाः प्रदर्शन्या उद्घाटन-संगोष्ठ्या अध्यक्षता श्रीलालबहादुरशास्त्रिसंस्कृत-विद्यापीठस्य प्राक्तनकुलपतिना डा० श्रीधरवासिष्ठमहाभागेन कृता। भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालये संस्कृतस्य उपपरामर्शदात्रा डा० नोदनाथमिश्र-महाभागेन सरस्वत्याः प्रतिमाग्रे दीपप्रज्वालनेन प्रदर्शन्या उद्घाटनं कृतं ।

अस्मिन्नवसरे 'अर्वाचीनसंस्कृते' प्रकाशिताः स्वकीया रचनाः आचार्यवीरेन्द्र कुमारझा, कविरत्नओम्प्रकाशठाकुर-कविरत्नश्रीकृष्णसेमवाल-रमाकान्त शुक्लैः पठिताः।

अस्मिन्नवसरे देववाणी-परिषत्पक्षतः अर्वाचीनसंस्कृतस्याक्षरयोजकस्य श्रीचन्द्रभानशर्मणोऽभिनन्दनमप्यक्रियत।

देववाणी-परिषदश्चतुर्विंशः स्थापनादिवसः

देववाणी-परिषदश्चतुर्विंशःस्थापनादिवससमारोहः १३.१२.१.१९९९ तारिकायां वाणीविहारे सम्मानितोऽभूत्। अस्मिन्नवसरे अर्वाचीनसंस्कृतप्रदर्शनी, चित्रप्रदर्शनी, ध्वन्यङ्कित-कार्यक्रमाणां प्रस्तुतिः, वीडियोफिल्मप्रदर्शनम् इत्याद्याः कार्यक्रमा आयोज्यन्त। परिषन्महासचिवेन सूचितं यदग्रिमं वर्षं (२००० ई०)परिषदो रजतजयन्तीवर्षत्वेन सम्मानयिष्यते यत्र नैके कार्यक्रमा अनुष्ठास्यते।

संस्कृतवर्षे संस्कृतपत्रिकापद्यपाठप्रतियोगिता

'देववाणी-परिषद्, दिल्ली' संस्कृतवर्षस्य विशिष्टायोजनत्वेन 'अ०भा० संस्कृतपद्यपाठप्रतियोगिता'मायोजयति। विस्तृता सूचना ६७-६८ तमपृष्ठयोर्द्रष्टव्या।

(आनन्दवर्धनः)

संस्कृत-जगद्वार्ता

मैनपुर्यां राष्ट्रिय संगोष्ठी

मैनपुरीस्थेन कुँअर आर० सी० महिला विद्यालयेन २६-२८.११.१९९९ तारिकासु विश्वविद्यालयानुदानायोगसहयोगेन 'इक्कीसवीं शताब्दी में संस्कृत : चुनौतियाँ और समाधान' इति विषयमवलम्ब्य त्रिदिवसीया राष्ट्रिया संस्कृत शोध-संगोष्ठी आयोजिता यस्या संयोजनं डा० किरण सिंह सेंगरमहोदयया, समन्वयनं डा० इच्छाराम द्विवेदी 'प्रणवेन' संरक्षणं निर्देशनं च प्राचार्यया डा० सुशीला त्यागीमहाभागया कृतम्। संगोष्ठ्या उद्घाटनसत्रस्य मुख्यातिथिना डा० राधावल्लभत्रिपाठिना आध्यक्ष्यं च डा० रमाकान्त शुक्लेन निर्व्यूढम्। अस्मिन्नवसरे डा० राधावल्लभत्रिपाठिनो नवप्रकाशितं प्रकरणं 'तण्डुलप्रस्थीयम्' डा० रमाकान्त

शुक्लेन 'उपाख्यानमालिका' च डा० भास्कराचार्यत्रिपाठिना लोकायार्पितं। संगोष्ठ्यां पञ्चविंशतिसंख्यानि पत्राणि पठितान्यभूवन्। अवसरेऽस्मिन् संस्कृतनाटकानां प्रस्तुतिः, संस्कृतकविसम्मेलनं, विद्वदभिनन्दनम्-इत्यादयः कार्यक्रमा आयोज्यन्त। संगोष्ठ्यामाचार्य लालबिहारी द्विवेदी आचार्य रवीन्द्रनाथ पन्त- डा० रामसनेही शर्म-'अभिराज' डा० राजेन्द्रमिश्र-डा० पुष्पा दीक्षित-डा० जनार्दनप्रसाद पाण्डेय मणि-डा० रामविनय सिंह-प्रभृतिभिः स्वविचारा रचनाश्च प्रस्तुताः। महाविद्यालयाध्यक्षेण कु० राजेन्द्रसिंह कुशवाहमहाभागेन विदुषां प्रावारकेणाभिनन्दनं कृतम्।

(राधावल्लभ मिश्रः 'राजीवः')

म०प्र० संस्कृत अकादेमी

(१) सागरनगरे मध्यप्रदेशसंस्कृतअकादम्या सहयोगेन डॉ० हरिसिंह गौर विश्वविद्यालयस्य संस्कृत विभागेन दशमो नवोदितप्रतिभासमागमः ४-५.१.२००० तारिकयोः समायोजितः यत्र शास्त्रार्थस्पर्धा, नाट्यस्पर्धा, निबन्धस्पर्धा, संस्कृत-गजलगायनस्पर्धाश्चायोज्यन्त यत्र शृंगेरी-दिल्ली-सागर-जबलपुर-भोपाल-प्रभृति स्थानेभ्यः समागतैः संस्कृतच्छात्रैः स्वप्रतिभायाः प्रकर्षः प्रदर्शितः। समापनसत्रस्याध्यक्ष्यं विक्रमवि०वि०संस्कृतविभागाध्यक्षेण डा० केदारनारायणजोशि महाभागेन कृतम्। डा० मिथिलाप्रसादत्रिपाठिना डा० दीक्षितपुष्पया च निर्णायकत्वं कृतम्।

(२) 'गालवसभागारः विश्वविद्यालय-परिसरः ग्वालियरनगरम्'-इत्यत्र १०-१३.१.२००० तारिकासु मध्यप्रदेश-संस्कृतअकादेमी-जीवाजीविश्वविद्यालय-स्थानीय महाकवि-भवभूति-समितेश्च संयुक्ततत्त्वावधाने समायोजिते चतुर्दिवसीये भवभूतिसमारोहे विविधाः प्रतियोगिताः 'महावीरचरितस्य' मञ्चीयप्रस्तुतिः नाट्यप्रस्तुतिश्च प्रस्तुताः जाताः।

डा० हरिसिंहगौरविश्वविद्यालये नाट्यशास्त्रसंगोष्ठी

डॉ० हरिसिंहगौरविश्वविद्यालयस्य संस्कृत-विभागेन ''नाट्यशास्त्र, संस्कृत नाटक तथा विश्व रंगमंच 'इत्यमु विषयमवलम्ब्य द्विदिवसीया संगोष्ठी ५-६.१.२००० तारिकयोः 'पुरातत्त्वसंग्रहालये' आयोजिता। संगोष्ठ्या उद्घाटनं कविसमीक्षकः श्री अशोकवाजपेयी अकरोत्। कुलपतिः श्रीशिवकुमार श्रीवास्तवः उद्घाटनसत्रस्य अध्यक्षतामकरोत्। संगोष्ठ्याश्चतुर्पु सत्रेषु सर्वश्री प्रयाग शुक्ल-महेश चम्पक लाल शाह- डा० जयदयाल-डॉ० रीता सक्सेना-ब.व. कारन्त-कमल वसिष्ठ- डॉ० गजानन हेगडे-डॉ० वसिष्ठनारायणत्रिपाठी-डॉ० क्षेत्रवासी पंडा-डां० सनतकुमार-डां० राधावल्लभ त्रिपाठी-डां० रमाकान्त पाण्डेय-डॉ० रमाकान्त शुक्ल-प्रभृतिः विद्वद्भिः शोपत्राणि पठितानि। संगोष्ठ्या आयोजनार्थं संयोजकः प्रो० श्रीराधावल्लभत्रिपाठी वर्धापनमर्हति।

दिल्ली संस्कृत अकादमी

(१) अकादम्या ३१.१०.१९९९ तारिकायां वाल्मीकिजयन्ती आयोजिता यत्र श्री रमाकान्त गोस्वामी, डॉ० रामकरण शर्मा, डॉ० मण्डनमिश्रः, डॉ० नोदनाथ मिश्रः, डॉ० कृष्णलालः, डॉ० आर०के० शर्मा, डॉ० शशि तिवारी, डॉ० धर्मा, डॉ जयन्तीप्रसाद मिश्रः, डॉ० चक्रधर बिजल्वाणः, काशीनाथतिवारी, श्री गुलाबचन्द शास्त्री, श्री श्रीधर बलूनी, डॉ० चांदकिरण सलूजा, इत्येतदादयो विद्वांसो वाल्मीकिरामायणमवलम्ब्य स्वविचारान् प्रस्तुतवन्तः। संगोष्ठ्या मुख्यातिथिरासीत् श्रीमोतीलाल बोकोलिया, अध्यक्षतामकारोत् श्रीकुलानन्द भारतीयः।

(२) अकादम्या १२.११.१९९९ तारिकायां जनकपुर्या 'ए' ब्लाकस्थ सर्वोदय-कन्याविद्यालये षड्दिवसीयसंस्कृतप्रतियोगितानाम् उद्घाटनसत्रम् आयोजितम् यत्र छात्राभिः ''भाति मे भारतम्'' सामूहिकरूपेण गीतम्।

उद्घाटनं प्रो० जगदीशमुखी अकरोत्। अस्मिन्नवसरे श्रीकृष्णदत्त शास्त्री-आचार्य नरेन्द्रपाण्डेय-श्रीमती मायादेवी गुप्ता- श्रीमती अंगूरला-डॉ० शक्ति कपूरप्रभृतिभिः स्वविचाराः प्रकटिताः। विशिष्टातिथिना डॉ० रमाकान्तशुक्लेन शपथमवलम्ब्य कविता श्राविता। सत्रस्याध्यक्ष्यं डॉ० आर०के० शर्मा अकरोत्। अकादमीसचिवेन श्रीकृष्णसेमवालेन धन्यवादज्ञापनं कृतम्। संचालनं डा० सुरेशपन्तेन कृतम्।

(३) २०-११-१९९९ तारिकायां कालिदासजयन्त्युपलक्ष्ये 'कालिदास साहित्ये पर्यावरणम्' इति विषयमवलम्ब्य परिचर्चा समायोजिता यत्र डॉ० मोहनचन्द्र-डॉ० रमाकान्त शुक्ल-डॉ प्रवेश सक्सेना-डॉ० धर्मा-डॉ० उर्मिल रस्तोगी-डॉ० शशि तिवारी-डॉ० सुषमा कुलश्रेष्ठ-प्रभृतिभिरभिभाषितम्।

(४) १८-१२-१९९९ तारिकायां १९९९ वर्षीयो विद्यालयीय/महा-विद्यालयीय संस्कृतसेवासम्मानसमारोहः समायोजितः।

(५) २१-१२-१९९९ तारिकायां 'महाविद्यालयीय संस्कृतकाव्यालि प्रतियोगिता'समायोजिता यत्र मुख्यातिथित्वं डॉ० योगानन्द शास्त्रिणा आध्यक्ष्यं च श्रीमता रमाकान्तगोस्वामिना निर्व्यूढम्।

(६) १२-१-२००० तारिकायां अकादम्या सभास्थले केन्द्रीय संस्कृत प्रतियोगिता समारोहः समायोजितः।

(७) अकादमी 'लिटिल थियेटर ग्रुप-प्रेक्षागृहे' १८-१-२००० तारिकायां नाट्यसमारोहं २०-१-२००० तारिकायां च गणतन्त्रदिवसोपलक्ष्ये अ० भा० संस्कृतकविसम्मेलनमायोजयति।

(अभिनवः शुक्लः)

अर्वाचीनसंकृतम्

(R. N. 34554/79

अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च- डॉ0 रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली । डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति। १५-१-२००० ई. रमाकान्तशुक्लः (प्रकाशकः, सम्पादकः)

अर्वाचीनसंकृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००.०० प्रतिपृष्ठम्
इतरपृष्ठस्य	१०००.०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००.००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम् (१९९७तः प्रभावि)

संस्थानां कृते	वार्षिकं (भारते) रु० ६०.००
	वार्षिकं (विदेशेषु) यू०एस० डालराः १०
	आर्जीवनं (भारते) रु० ४००.००
	आजीवनं (विदेशेषु) यू०एस० डालराः १००
व्यक्तीनां कृते	वार्षिकं (भारते) रु० ४०.००
	वार्षिकं (विदेशेषु) यू एस० डालराः १०
	आजीवनं (भारते) रु० ४००.००
	आजीवनं (विदेशेषु) यू०एस० डालराः १००
डाकव्ययः	यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीनसंस्कृतस्य सर्वेऽप्यटाः प्रेष्येरन् ,
	भारते रु० ६८.००
	विदेशेषु यू०एस० डालराः २०
	गतांकानां (Back Volumes) वार्षिक मूल्यम् रु० १००/-

देववाणी–परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते । किन्तु पञ्जीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात् । ग्राहकाः ग्राहकशुल्कम् 'अर्वाचीनसंस्कृतम् (Arvacheenasanskritam) 'इत्यंकितेन दिल्त्यां/नवदिल्त्यां प्रदेयेन बैंक ड्राफ्टेन/धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यने :-

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-६, वाणी-विहारः, नयी दिल्ली-११००५९ (भारतम्)

गार्ग नागपुराम

आवश्यकी सूचना

अ०भा० संस्कृतपत्रिका–पद्यपाठप्रतियोगिता

'देववाणी-परिषद्, दिल्ली'ति संस्थया रजतजयन्तीवर्षे संस्कृतवर्षस्य विशिष्टयोजनत्वेन नवदिल्ल्यां २००० तमे खैष्टेऽब्दे फरवरीमासे 'संस्कृतपत्रिका-पद्यपाठप्रतियोगिता' समायोजयिष्यते। अस्यां प्रतियोगितायां प्रतियोगिभिः संस्कृतस्य पञ्जीकृत-सावधिकपत्रिकासु इदम्प्रथमतया प्रकाशितानां किञ्च शालीनजनसंसदि प्रस्तोतव्यानां संस्कृतश्लोकानां/गीतीनां कण्ठस्थतया सस्वरं शुद्धः पाठः करणीयो भवेत्। केषाञ्चित्पद्यानां संस्कृतमाध्यमेन भावप्रकाशनं समीक्षणञ्चापि करणीये स्याताम्। प्रतियोगिनां चत्वारो वर्गा भविष्यन्ति येषां विवरणमधोदत्तमस्ति–

१. प्रथमो वर्गः–शोधवर्गः (एम्०फिल्०-पीएचडी०-छात्राः)। अधिकतमायुस्सीमा : ३२ वर्षाणि यावत्। संश्राव्यपद्यसंख्या : अनुष्टुब्वर्जं १२५ पद्यानि ५० गीतिका वा (गीतिकासु गीत-गजल-गेयपदादीनामन्तर्भावो भवेत्। अग्रेऽप्यधिकारोऽयम्)। भावप्रकाशन-समीक्षणार्थं ५ पद्यानि ३ गीतिका वा अपेक्ष्येरन्। प्रथमः पुरस्कारः ७००० रूप्यकाणां (यत्र ५००० रूप्यकाणां राशिः किञ्च २००० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च दास्यन्ते)। द्वितीयः पुरस्कारः ५००० रूप्यकाणां (यत्र ३५०० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। तृतीयः पुरस्कारः ४००० रूप्यकाणां (यत्र २५०० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। सान्त्वना/ सम्भावना-पुरस्काराः पञ्च प्रत्येकं २००० रूप्यकाणां (यत्र १४०० रूप्यकाणां राशिः किञ्च ६०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)।

२. द्वितीयो वर्गः–विश्वविद्यालयवर्गः (स्नातक-स्नातकोत्तरकक्षीयाश्छात्राः)। अधिकतमायुस्सीमा : २५ वर्षाणि यावत्। संश्राव्यपद्य- संख्या : अनुष्टुब्वर्जं १०० पद्यानि ४० गीतिका वा । भावप्रकाशन-समीक्षणार्थं ४ पद्यानि २ गीतिके वा अपेक्ष्येरन्। प्रथमः पुरस्कारः ६५०० रूप्यकाणां (यत्र ४५०० रूप्यकाणां राशिः किञ्च २००० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च दास्यन्ते)। द्वितीयः पुरस्कारः ४५०० रूप्यकाणां (यत्र ३००० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। तृतीयः पुरस्कारः ३५०० रूप्यकाणां (यत्र २००० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। सान्त्वना/ सम्भावना-पुरस्काराः पञ्च प्रत्येकं २००० रूप्यकाणां (यत्र १४०० रूप्यकाणां राशिः किञ्च ६०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)।

३. तृतीयो वर्गः–उच्चतरमाध्यमिकवर्गः (नवम-द्वादशकक्षीयाश्छात्राः)। अधिकतमायुस्सीमा : १९ वर्षाणि यावत्। संश्राव्यपद्यसंख्या : अनुष्टुब्वर्जं ८० पद्यानि ३० गीतिका वा । भावप्रकाशन-समीक्षणार्थं २ पद्ये १ गीतिका वा अपेक्ष्येयाताम्। प्रथमः पुरस्कारः ६००० रूप्यकाणां (यत्र ४००० रूप्यकाणां राशिः किञ्च २००० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च दास्यन्ते)। द्वितीयः पुरस्कारः ४००० रूप्यकाणां (यत्र

२५०० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। तृतीयः पुरस्कारः ३००० रूप्यकाणां (यत्र १५०० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। सान्त्वना/सम्भावना-पुरस्काराः पञ्च प्रत्येकं २००० रूप्यकाणां (यत्र १४०० रूप्यकाणां राशिः किञ्च ६०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)।

४. **चतुर्थो वर्गः–प्राथमिकमाध्यमिकवर्गः** (प्रथमकक्षातः अष्टमकक्षीयाः/प्रवेशिका-प्रथमाकक्षीयाश्छात्राः) । अधिकतमायुस्सीमा : १४ वर्षाणि यावत्। संश्राव्यपद्यसंख्या : अनुष्टुब्वर्जं ६० पद्यानि २० गीतिका वा । भावप्रकाशन-समीक्षणार्थं १ पद्यं १ गीतिका वा अपेक्ष्येत । प्रथमः पुरस्कारः ५५०० रूप्यकाणां (यत्र ३५०० रूप्यकाणां राशिः किञ्च २००० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च दास्यन्ते)। द्वितीयः पुरस्कारः ४००० रूप्यकाणां (यत्र २५०० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। तृतीयः पुरस्कारः ३००० रूप्यकाणां (यत्र १५०० रूप्यकाणां राशिः किञ्च १५०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)। सान्त्वना/सम्भावना-पुरस्काराः पञ्च प्रत्येकं २००० रूप्यकाणां (यत्र १४०० रूप्यकाणां राशिः किञ्च ६०० रूप्यकाणां संस्कृतग्रन्थाः ध्वनिपट्टिकाश्च)।

विशेषः–दशाधिकानामुच्चारणगतानामशुद्धीनां कर्ता प्रथमं पुरस्कारं लब्धुमनर्हः स्यात्। 'ऋ' इत्यस्य वर्णस्य 'रु'-'रि'-स्वरूपं 'ज्ञ' संयुक्त वर्णस्य 'ग्य'-'ग्न' 'द्न' 'ज्यँ'-रूपमुच्चारणमनुमतं स्यात्। शकार-षकारयोः समानमुच्चारणमनुमतं भवेत् किन्तु सकारशकारयोस्समानमुच्चारणं मान्यं न स्यात्। यद्यपि मुद्रणगता अशुद्धयो यथावत्प्रस्तुयेरंश्चेत्तदा प्रतियोगिनां दोषो न स्यात् तथापि प्रतियोगिभ्यः परामर्शो दीयते यत्तं पद्यानां कण्ठस्थीकरणात्पूर्वं तानि स्वगुरून् दर्शयित्वा संशोधयेयुः। द्वितीयतृतीयचतुर्थवर्गेषु लब्धप्रथमपुरस्काराणां प्रतियोगिनां शिक्षाभ्यासकारयितृभ्यो गुरुभ्योऽपि ११०० रूप्यकात्मकः सत्कारराशिः समर्पयिष्यते। त्रिंशत्पद्येभ्यो न्यूनानां पद्यानां श्रावयितारः प्रतियोगिनः कमपि पुरस्कारं लब्धुमनर्हाः स्युः। कस्मिंश्चिद्वर्गे प्रविष्टीनां न्यूनत्वे सति तद्वर्गीय पुरस्कारराशेरपरस्मिन्नधिक प्रविष्टिवतिवर्गे समायोजनापि सम्भाव्यते। निर्णेतॄणां निर्णयः सर्वमान्यः स्यात्।

प्रतियोगितायां प्रवेशार्थं प्रत्येकं प्रतियोगिना १० रूप्यकात्मकः प्रवेशशुल्कः प्रतियोगिता-स्थले प्रतियोगितायाः प्रारम्भात् एकघण्टापूर्वं यावत् देयो भवेत्। संस्थाभिः प्रतिवर्गं द्वयोः प्रतियोगिनोर्जन्मतिथिप्रमाणसहितानि नामानि किञ्च प्रस्तोतव्यानां पद्यानां/गीतिकानां छायाप्रति-रूपाणि (फोटोस्टेट) पत्रिकासन्दर्भसहितानि अधोहस्ताक्षरिणः समीपे ३१-१-२०००ई० तारिकापर्यन्तमवश्यमेव प्रापणीयानि स्युः। आवागमनावासभोजनव्यवस्था प्रतियोगिसंस्थाभिः स्वयं करणीया स्यात्। प्रतियोगिभ्यः प्रतियोगितायाः निश्चिततिथेः, समयस्य आयोजनस्थलस्य च सूचना पृथक्शः दास्यते। दूरभाषतोऽपि ज्ञातुं शक्यते।

१५-१-२०००

(डॉ० रमाकान्त शुक्लः)
महासचिवः, देववाणी-परिषद्, दिल्ली
आर-६, वाणी-विहारः, नयी दिल्ली-११००५९ (दूरभाष सं ५६३९१४६)

↑ प्रसिद्ध हिन्दी लेखको डा० रामदरश मिश्रः द्वावदशतमे पण्डितराज-महोत्सवे श्लोकपाठ प्रतियोगिने पुरस्कारं ददाति। (२४.१०.१९९९)

↑ द्वादशतमे पण्डितराजमहोत्सवे कु० ऋतु शर्मा निधिः शर्मा च परिषन्महासचिवात् रमाकान्तशुक्लात्पुरस्कारं लभेते (२४.१०.१९९९)

↑अर्वाचीनसंस्कृत-प्रदर्शन्या उद्घाटनसत्रे (वामतो दक्षिणं) श्रीकृष्ण सेमवालः, डॉ० नोदनाथमिश्रः, डॉ० श्रीधरवासिष्ठः, रमाकान्त शुक्लः, पं० चन्द्रभानशर्मा, कविरत्न ओम्प्रकाश ठाकुरश्च (दि० १२-१२-१९९९)

↑अर्वाचीनसंस्कृत-प्रदर्शन्या उद्घाटको डॉ० नोदनाथ मिश्रः अक्षरसंयोजकं पं० चन्द्रभानशर्माणं माल्यार्पणेभिनन्दति (दि० १२-१२-१९९९)